16–17 Every one of these four types of hero could be again, four-fold : ( this classification is based on the attitude of the heroes to women in love ) : 1. anukūla; 2. śaṭha; 3. dhṛṣṭa; and 4. dakṣiṇa

18–19 Definition of Anukūla and his illustration

20–21 Definition of Śaṭha and his illustration

22–23 Definition of Dhṛṣṭa and his illustration

24–26 Definition of Dakṣiṇa and his two illustrations

27–28 These four types are applicable to each class of hero in love, there are sixteen possible kinds of hero, and further, each of these may be a high-class, middle class or inferior

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



person. Thus, in all, there may be forty-eight types of hero in love.

29 enumerates four upanāyakas who help these heroes; 1. Vidūṣaka; 2. Pīṭha-marda; 3. Viṭa and 4. Nāgarika.

30 defines Vidūṣaka.

31 defines Pīṭhamarda.

32 defines Viṭa and Nāgarika.

33 defines a Pratināyaka ( the enemy of the hero ).

34-35 enumerate a set of eight special excellences springing from their character ( Sāttvika ) which these heroes possess in their youth. They are : 1. Tejas; 2. Vilāsa; 3. Mādhurya; 4. Śobhā; 5. Sthairya; 6. Gabhīratā ( = Gāmbhīrya ); 7. Audārya; and 8. Lalita.

36 defines Tejas.

37 defines Vilāsa.

38 defines Mādhurya.

39 defines Śobhā and Sthiratva ( = Sthairya )

40 defines Gāmbhīrya.

41 defines Audārya.

42 defines Lalita.

43 The author now proposes to define and treat of the Types of Heroine.

44 Definition of heroine and her four types

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



45 These ( four types of heroine ) are : 1. Svakiyā; 2. Parakīyā; 3. Anūḍhā and 4. Sādhāraṇa; according to some Anūḍhā is Parakīyā only, hence there are only three types of heroine.

46 Definition of Svakīyā and Anyā.

47–48 Description of Svīyā ( = Svakīyā ) and her excellences.

49 Illustration of Svīyā

50 Definition of Anūḍhā.

51 Illustration of Anūḍhā.

52–53 According to some Parakīyā should be treated as Anūḍhā for there is very little difference between the two : Anūḍhā, who is herself fallen in love, desires the company of her hero; Parakīyā approaches the hero at the behest of her Sakhī. According to some others, however, there is absolutely no difference between the two.

54–55 "Parakīyā is a woman, may be married or unmarried, who is not the mistress of herself. An amour with a married woman may not form the subject of the dominant sentiment in the play but that with a maiden may occur as an element in the principal or the secondary action."

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



56 Illustration of Princesses cherishing love for Rāyavaṅga.

57 defines Sādhāraṇa Nāyikā.

58 She should accept the rich as lover and avoid the poor.

59 Illustration of such Nāyikās.

60 The hero's wife may be 1. mugdhā (inexperienced), 2. madhyā (partly experienced) and 3. pragalbhā (fully experienced and bold).

61–62 define and illustrate Mugdhā.

63–64 define and illustrate Madhyā.

65–66 define and illustrate Pragalbhā.

67 enumerates three types of Madhyā Nayikā.

68–69 Definition and illustration of Dhīrā Madhyā.

70–71 Definition and illustration of Adhīrā Madhyā.

72 The heroine who is fully experienced and bold is again of three kinds : 1. dhīrā; 2. adhīrā; and 3. dhīrādhīrā.

73–74 Definition of Pragalbhā-dhīrā.

75–76 Illustrations of Pragalbhā-dhīrā.

77–78 Definition and illustration of adhīrā-pragalbhā.

79–80 Definition and illustration of dhīrādhīrā-pragalbhā.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



81 Madhyā who is of three types is, again, classified into Jyeṣṭhā ( Senior ) and Kaniṣṭhā ( Junior ); thus Madhyā is of six kinds.

82 Similarly, Pragalbhā too, is of six kinds.

83 Illustration of Jyeṣṭhā and Kaniṣṭhā.

84–86 After having defined heroines and their types the author now treats of the heroine's eight different relations to her lover: 1. Svādhīnapatikā; 2. Vāsikasajjikā ( vāsakasajjā ); 3. Kalahāntaritā; 4. Vipralabdhā; 5. Virahotkaṇṭhitā; 6. Proṣitabhartṛkā; 7. Khaṇḍitā and 8. Abhisārikā.

87–88 Definition and illustration of Svādhīnapatikā.

89–90 Definition and illustration of Vāsikasajjikā (=Vāsakasajjā).

91–92 Definition and illustration of Kalahāntaritā.

93–94 Definition and illustration of Vipralabdhā.

95–96 Definition and illustration of Virahotkaṇṭhitā.

97–98 Definition and illustration of Proṣitabhartṛkā.

99–100 Definition and illustration of Khaṇḍitā.

101–102 Definition and illustration of Abhisārikā.

103–104 Vipralambha-śṛṅgāra and its four kinds: 1. pūrvānurāga 2. māna; 3. pravāsa and 4. karuṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



105 Definition of Pūrvānurāga.

106 Definition of māna and of Pravāsa.

107 Definition of Karuṇa.

108 Māna and Pravāsa ( vipralambha ) śṛṅgāra have reference to Khaṇḍitā and Proṣitapriyā.

109 Pūrvānurāga ( vipralambha ) śṛṅgāra has reference to kalahāntaritā vipralabdhā and virahotkaṇṭhitā

110 Karuṇātmaka ( vipralambha )—śṛṅgāra refers to a woman mourning the death of her husband, or to any one in bereavement.

111 The heroine's ( female ) messenger may be a friend ( sakhī ), a slave ( dāsi ), a nun ( liṅginī ), a neighbour ( prativeśini ), a foster-sister ( dhātreyī ), an artist ( śilpikā ) or a workwoman (kāru) or self.

112 Illustration of a messenger.

113 The heroines described above, possess twenty excellences, springing from their character, when they are in the prime of youth.

114–116 These excellences are : 1. bhāva, 2. hāva, 3. helā, 4. śobhā, 5. kānti, 6. dīptikā ( = dīpti ), 7. madhuratva ( = mādhurya ), prāgalbhya ( = pragalbhatā), 9. vadānyatā = ( = audārya), 10. dhairya, 11. līlā,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



12, vilāsa, 13. vicchitti, 14. vibhrama, 15. kilakiñcita, 16. moṭṭāyita, 17. kuṭṭamita, 18. bibboka, 19. lalita, and 20. vihṛta.

117 of these twenty, the first three are physical; the next seven are alaṁkṛtis; and the remaining ten are svābhāvika (svabhāvaja).

118–120 Definition (and description) of bhāva and its illustration.

121–122 Definition of hāva and its illustration.

123–124 Definition of helā and its illustration.

125–126 Definition of śobhā and its illustration.

127–128 Definition of kānti and its illustration.

129–130 Definition of dīpti and its illustration.

131–132 Definition of mādhurya and its illustration.

133–134 Definition of pragalbhatā and its illustration.

135–136 Definition of audārya and its illustration.

137–138 Definition of dhairya and its illustration.

139–140 Definition of līlā and its illustration.

141–142 Definition of vilāsa and its illustration.

143–144 Definition of vicchitti and its illustration.

145–146 Definition of vibhrama and its illustration.

147–148 Definition of kilakiñcita and its illustration.

149–152 Alternative definitions of moṭṭāyita and its illustrations.

153–154 Definition of kuṭṭamita and its illustration.

155–156 Definition of bibboka and its illustration.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



157–158 Definition of lalita and its illustration.

159–160 Definition of vihṛta and its illustration.

161 The hero's good qualities like modesty, etc. and a set of eight special excellences have been described. The author refrains from quoting examples but suggests that the wise should find them out for themselves.

162 The author states : excellences like bhāva, hāva, and so on, are described with reference to heroines; however, illustrations of these excellences may suitably be found even in clever heroes.

163 Conclusion : The author pays tributes to King Vīranṛsiṁha for his eminence as a noble and exalted hero.

## CHAPTER V

### Daśa-guṇa-niścaya

[ A Study of Ten Guṇas ]

1–3 A poetic composition, devoid of Guṇas, is worthless. The author, therefore, following the authoritative works on poetics describes these Guṇas and requests King Kāmirāja to listen to his exposition.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



4–5 There are ten Guṇas which are proclaimed as the Ten Prāṇas ( of poetic styles ) : 1. Sukumāratva (= Saukumārya), 2. Audārya, 3. Śleṣa, 4. Kānti, 5. Prasannatā (= Prasāda), 6. Samādhi, 7. Ojas, 8. Mādhurya, 9. Arthavyakti, and 10. Sāmyaka (= Samatā).

6-7 Definition of Saukumārya and its illustration.

8–10 Alternative definitions of Audārya and its illustration.

11–12 Definition of Śleṣa and its illustration.

13–14 Alternative definition of Śleṣa and its illustration.

15–17 Alternative definitions of Kānti and its illustration.

18–19 Definition of Prasannatā (= Prasāda) and its illustration.

20–22 Alternative definition of Samādhi and its illustration.

23–24 Definition of Ojas and its illustration.

25–26 Definition of Mādhurya and its illustration.

27–28 Definition of Arthavyakti and its illustration.

29–30 Definition of Samatā and its illustration.

31 Conclusion : "May the King Rāyavaṅgendra, find delight in works of Mahākavis, bright with these Guṇas."

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# CHAPTER VI

## Rīti-niścaya

[ A Study of Rīti ]

1 Poetry devoid of Rīti is not approved of by connoisseurs.

2 Hence the author defines (and describes) Rīti and its kinds and urges the King to listen to them attentively.

3–5 Set forth the nature and definition of Rīti, and its four kinds : 1. vaidarbhī, 2. gauḍikā ( = gauḍī), 3. lāṭī and 4. pāñcālī

6–8 Definition of Vaidarbhī and its illustration.

9–10 Definition and illustration of Gauḍī.

11–12 Definition and illustration of Pāñcālī.

13–14 Definition and illustration of Lāṭī.

15 Śṛṅgāra–, Karuṇa, Śānta, and Hāsya– these Rasas are imbued with sweetness. The remaining five Rasas are marked by Ojas-vigour.

16 All the nine Rasas are possessed of the quality called "lucidity". The poet skilled as he is, should employ the remaining seven Guṇas according to need.

17 Conclusion : "May the King—the royal

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Swan—sport in the lake of kāvya dotted by groups of lotuses.

## CHAPTER VII

### Vṛtti-niścaya

[ Nature of Vṛtti—Manner or Style ]

1–2 Readers do not like poetry if it is devoid of Vṛtti. Vṛtti is, therefore, defined and its varieties too, are explained and illustrated.

3 Defines Vṛtti and enumerates its varieties : 1. kaiśikī, 2. ārabhaṭī, 3. bhāratī and 4. sāttavatī.

4 defines kaiśikī.

5 defines ārabhaṭī.

6 defines bhāratī.

7 defines sāttvatī.

8–9 Nature of Rasas.

10 illustrates kaiśikī.

11 illustrates ārabhaṭī.

12 illustrates bhāratī.

13 illustrates sāttvatī.

14 Madhyamā Kaiśikī is suited to all Rasas.

15 Madhyamā ārabhaṭī is suited to all Rasas. The author then brings out the difference between Vaidarbhī and other Rītis on the

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



one hand and Kaiśikī and others on the other hand, and defines four kinds of Sandarbha.

16 Conclusion : "May the fame of King Nādañjanātha endure for long.

## CHAPTER VIII

### Śayya-pāka-niścaya

[ Nature of Śayyā and Pāka ]

1–3 Śayyā

V1 Śayyā is essential to any literary work.

V2 defines śayyā as "Mutual Suitability of Words" or "The maitrī of Words."

V3 Illustrates Śayyā.

4–9 Pāka

4 A poetic composition devoid of pāka is not liked by any one.

5 defines Pāka as "profundity of fourfold meaning-sense, and speaks of two kinds of pāka : 1. Drākṣā and 2. Nālikera.

6 defines Drākṣā-pāka.

7 defines Nālikera-pāka.

8 illustrates Drákṣā pāka.

9 illustrates Nālikera-pāka.

10 Conclusion.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## CHAPTER IX

### Alaṁkāra-nirṇaya

[ The Nature of Alṁkāras ]


1 A poem devoid of Alaṁkāras does not look graceful.

2–5 Alaṁkāras are the source of poetic charm; are of two kinds depending on śabda and artha ( Sound and Sense, Word and Sense ) Śabdālaṁkāras are fourfold: Yamaka, 2. Citra, 3. Vakrokti, 4. Anuprāsa; Arthālaṁkāras are, however, manifold such as Svabhāvokti.

6 request to King Śrīrāyavaṅga to listen to alaṁkāras

7 Leaves aside śabdālalaṁkārs and defines arthālaṁkāras.

8–13 enumerate 47 arthālaṁkāras.

14–22 Svabhāvokti or Jāti with its varieties and illustrations.

14 Svabhāvokti.

15 Jāti ( Sakriya or Niṣkriya Vastu )

16–17 Sakriya

18 Niṣkriya


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



19–22 fourfold Jāti based on Jāti, Kriyā, Guṇa and Dravya.

23–64 Upamā

23 Upamā

24 Dharmopamā

25 Vastūpamā

26 Viparyāsopamā

27 Anyonyopamā

28 Niyamopamā

29 Anvyamopamā

30 Samuccayopamā

31 Atiśayopamā

32 Utprekṣopamā

33 Adbhutopamā

34 Mohopamā

35 Saṁśayopamā

36 Nirṇayopamā

37 Śleṣopamā

38 Saṃtānopamā

39 Nindopamā

40 Praśaṁsopamā

41 Ācikhyāsopamā

42 Virodhopamā

43 Pratiṣedhopamā

44 Caṭūpamā

45 Tatyākhyānopamā

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



46 Asādhāraṇopamā

47 Abhūtopamā

48 Asambhāvitopamā

49 Bahūpamā

50 Vikriyopamā

51 Mālopamā

52 Ekevaśabdā Vākyārthopamā

53 Anekevaśabdā Vākyārthopamā

54 Prativastūpamā

55 Tulyayogopamā

56 Hetūpamā

57–61(ab) Upamādoṣas

61(cd)–62 declare that Upamā occurs when there is intention on the part of the Speaker to refer to Dharma only.

63–64 enumerate or list words which are expressive or suggestive of Upamā.

65–86 Rūpaka

65 Definition of Rūpaka

66 Samastarūpaka

67 Vyasta-rūpaka

68 Samasta-Vyasta-rūpaka

69 Sakala-rūpaka

70 Avayava-rūpaka

71 Avayavi-rūpaka

४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



72 Ekāvayava-rūpaka ( Dvyavayava-rūpaka, tryavayava-rūpaka )

73 Yukta-rūpaka

74 Ayukta-rūpaka

75 Viṣama-rūpaka

76 Saviśeṣaṇa-rūpaka

77 Viruddha-rūpaka

78 Hetu-rūpaka

79 Upamā-rūpaka

80 Vyatireka-rūpaka

81 Ākṣepa-rūpaka

82 Samādhāna-rūpaka

83 Rūpaka-rūpaka

84 Tattvāpahnuti-rūpaka

85-86 The author states that 33 divisions of Upamā and 20 divisions of Rūpaka have been described. The divisions of these two Alaṁkāras are infinite. Only a few of them are illustrated here.

87–90 Āvṛtti

87 Āvṛtti and its three varieties

88 Arthāvṛtti

89 Padāvṛtti

90 Ubhayāvṛtti

91–97 Hetu

91 Definition of Hetu

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



92 Hetu-alaṁkāra is manifold being based on the statement of Kāraṇa or Jñāpaka-hetu
93 Nirvartyakārakaviṣaya-hetu
94 Abhāvarūpa-nirvartyaviṣaya-hetu
95 Vikārya-viṣaya-kāraka-hetu
96 Prāpyaviṣaya-kāraka-hetu
97 Jñāpaka-hetu
98–118 Dīpaka
98 Definition of Dīpaka
99 Ādivarti-jātipada-dīpaka
100 Ādivarti-Kriyāpada-dīpaka
101 Ādivarti-guṇapada-dīpaka
102 Ādivarti-dravyapada-dīpaka
103 Adivarti-Saṁjñāpada-dīpaka
104 Madhyavarti-jātipada-dīpaka
105 Madhyavarti-Kriyāpada-dīpaka
106 Madhyavarti-guṇapada-dīpaka
107 Madhyavarti-dravyapada-dīpaka
108 Madhyavarti-Saṁjñāpada-dīpaka
109 Antyavarti-jātipada-dīpaka
110 Antyavarti-Kriyāpada-dīpaka
111 Antyavarti-guṇapada-dīpaka
112 Antyavarti-dravyapada-dīpaka
113 Antyavarti-Saṁjñāpada-dīpaka
114 Mālādīpaka
115 Viruddhārtha-dīpaka

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



116 Śliṣṭārtha-dīpaka

117 Ekārtha-dīpaka

118 Antyakriyā-dīpaka. The author states that this variety is illustrated here, once more, on account of "Bhāva-Camatkāra"

119–126 Utprekṣā

119 Definition of Utprekṣā

120 Words expressive of Utprekṣā

121 Vācya–and Pratīyamāna-Utprekṣā; Vācya-Utprekṣā-defined

122 Pratīyamāna-Utprekṣā-defined

123 alludes to 56 and 46 divisions of Vācyotprekṣā and Pratīyamānotprekṣā respectively.

124 Their illustrations should be known from other works. Here only the two primary and main divisions are described.

125 illustrates Vācyotprekṣā

126 gives another illustration of Vācyotprekṣā; the author states that following his predecessors he too does not give any illustration of Pratīyamānotprekṣā.

127–137 Arthāntaranyāsa.

127 Definition of Arthāntaranyāsa.

128 Viśvavyāpi-arthāntaranyāsa.

129 also an example of Viśvavyāpi-arthāntaranyāsa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



130 Viśeṣastha-arthāntaranyāsa.
131 Śliṣṭa-arthāntaranyāsa.
132 Viruddha-arthāntaranyāsa.
133 Ayukta-arthāntaranyāsa.
134 Yukta-arthāntaranyāsa.
135 Yuktāyukta-arthāntaranyāsa
136 Viparyaya-arthāntaranyāsa.
137 States that there are other divisions also of this Arthāntaranyāsa; their examples should be known from other works.
138-146 Vyatireka.
138 Definition of Vyatireka.
139 Eka-vyatireka.
140 Ubhaya-vyatireka.
141 Sākṣepa-vyatireka.
142 Sahetu-vyatireka.
143 Ādhikyopeta-bheda-lakṣaṇa-vyatireka.
144 Sadṛśa-vyatireka.
145 Another illustration of Sadṛśa-vyatireka.
146 Sajāti-vyatireka.
147-149 Vibhāvanā.
147 Definition of Vibhāvanā
148 Kāraṇāntarakalpanā-vibhāvanā.
149 Svabhāva-vibhāvanā.
150-174 Ākṣepa.
150 Definition of Ākṣepa (Three Divisions).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



151 Atītākṣepa.
152 Vartamānākṣepa.
153 Anāgatākṣepa.
154 Dharmākṣepa.
155 Dharmyākṣepa.
156 Kāraṇākṣepa.
157 Kāryākṣepa.
158 Anujñākṣepa.
159 Prabhutvākṣepa.
160 Anādarākṣepa.
161 Āśīrvacanākṣepa.
162 Sācivyākṣepa.
163 Yatnākṣepa.
164 Paravaśākṣepa.
165 Upāyākṣepa.
166 Roṣākṣepa.
167 Anukrośākṣepa,
168 Anuśayākṣepa.
169 Śliṣṭākṣepa.
170 Saṁśayākṣepa.
171 Arthāntarākṣepa.
172 Hetvākṣepa.
173 Dharmākṣepa is again illustrated on account of "Bhāva-Camatkāra".
174 Other divisions of Ākṣepa should be known (from other works) by the wise.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



175–179 Atiśayokti.
175 Definition of Atiśayokti.
176 illustrates Atiśayokti.
177 Saṁśayātiśayokti.
178 Niścayātiśayokti.
179 Adbhutātiśayokti or Virodhātiśayokti.
180–181 Sūkṣma.
180 Definition of Sūkṣma.
181 illustrates Sūkṣma.
182–185 Samāsokti-
182 Definition of Samāsokti.
183 Samānaviśeṣaṇa-bhinna-viśeṣya-samāsokti.
184 Bhinnābhinna-viśeṣaṇa-samāsokti.
185 Apūrva-samāsokti. This Alaṁkāra should be described by another name, viz, Anyāpadeśa.
186–188 Lava (Leśa or Nindā-stuti).
186 Definition of Lava.
187 Vacogopana-leśa.
188 Ceṣṭāprakāśana-leśa.
189–191 Krama.
189 Definition of Krama.
190 Illustrates Krama.
191 Another example of Krama.
192–194 Udātta.
192 Definition of Udātta.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



193 Illustrates Buddhi mahattva-Udātta.

194 Illustrates Aiśvaryamahattva.

195-200 Apahnava (= Apahnuti)

195 Definition of Apahnava.

196 Svarūpāpahnava.

197 Another example of Svarūpāpahnava.

198 Still another example of Svarūpāpahnava.

199 Viṣayāpahnava.

200 States that upamāpahnava has already been described under Upamā; and that the wise should detect from among stanzas other divisions.

201-202 Preyas.

201 Definition of Preyas.

202 illustrates Preyas.

203 207 Virodha.

203 Definition of Virodha.

204-206 illustrate Śabdakṛtavirodha.

207 illustrates Arthakṛta-virodha.

208-220 Rasavat.

208 Definition of Rasavat.

209 Śṛṅgārākhya.

210 Yuddhavīra-rasākhya.

211 Dānavīra-rasākhya.

212 Dharmavīra-rasākhya.

213 Karuṇākhya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



214 Bībhatsākhya.

215 Hāsyākhya.

216 Adbhutākhya.

217 Bhayānakākhya.

218 Raudrākhya.

219 Śāntarasākhya.

220 Speech attains to the state of Rasa on account of these nine Rasas, according to others, however, eight Rasas excluding Śānta.

221-222 Ūrjasvī.

221 Definition of Ūrjasvī.

222 illustrates Ūrjasvī.

223-225 Aprastuta-praśaṁsā.

223 Definition of Aprastuta-praśaṁsā.

224-225 illustrate Aprastuta-praśaṁsā.

226-232 Viśeṣokti.

226 Definition of Viśeṣokti.

227 Guṇavaikalya-viśeṣokti.

228 Jātivaikalya-viśeṣokti.

229 Kriyāvaikalya-viśeṣokti.

230 Dravyavaikalya-viśeṣokti.

231 Hetu–viśeṣokti.

232 States that there are other divisions of Viśeṣokti. The wise should conceive of them.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



233–237 Tulyayogitā.

233 Definition of Tulyayogitā.

234 Two divisions of Tulyayogitā based on Stuti and Nindā.

235 Stutipara-tulyayogitā.

236 One more illustration of Stutipara-tulyayogitā

237 Nindāpara-tulyayogitā

238–239 Paryāyokta

238 Definition of Paryāyokta

239 illustrates Paryāyokta.

240-244 Sahokti

240 Definition of Sahokti

241 Guṇasahabhāvakathana-Sahokti

242 Kriyāsahabhāvakathana-Sahokti

243 gives an alternative definition of Sahokti

244 illustrates Sahokti as defined in v243 and designates it Kāryakāraṇa-sahajanma-Kathana-Sahokti.

245–247 Parivṛtti ( two divisions )

245 Definition of Parivṛtti

246 Sadṛśārtha-parivṛtti

247 Visadṛśārtha-parivṛtti

248–249 Samāhita (= Samādhi )

248 Definition of Samāhita

249 illustrates Samāhita.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



250–260 Śliṣṭa ( = Śleṣa )

251 Abhinnapada-Śliṣṭa ( = Śleṣa)

252 Bhinnapada-Śliṣṭa (= Śleṣa)

253 States that Śleṣa accompanying Vyatireka and other Alaṁkāras has already been shown. A few other Śleṣas are described hereafter.

254 Kriyaika–abhinna-śleṣa ( = Abhinnakriyā-śleṣa )

255 Aviruddha Kriyāśleṣa

256 Viruddhakriyāśleṣa

257 Saniyama śleṣa

258 Niyamaniṣedhaśleṣa

259 Aviruddha śleṣa

260 Upamā-śleṣa

261–263 Nidarśana ( = Nidarśanā)

261 defines Nidarśana ( two kinds )

262 Praśasta-nidarśana

263 Apraśasta-nidarśana

264-267 Vyājastuti

264 defines Vyājastuti

265 illustrates Vyājastuti

266 Śliṣṭa Vyājastuti

267 States that Vyājastuti has infinite varieties.

268–270 Āśīḥ

268 defines Āśīḥ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



269–270 illustrate Āśīḥ

271–273 Samuccaya

271 defines Samuccaya.

272 Atyutkṛṣṭa samuccaya

273 Atyapakṛṣṭa Samuccaya

274–275 Vakrokti

274 defines Vakrokti.

275 illustrates Vakrokti.

276–279 Anumāna ( three divisions )

276 defines Anumāna

277 Vartamāna-Sādhya-gocara

278 Atīta-sādhya-gocara

279 Bhāvi-sādhya-gocara

280–281 Viṣama

280 defines Viṣama.

281 illustrates Viṣama.

282–283 Avasara

282 defines Avasara.

283 illustrates Avasara.

284–285 Prativastūpamā

284 defines Prativastūpamā.

285 illustrates Prativastūpamā. The author adds a remark "according to some this Alaṁkāra is included in Upamā"

286–287 Sāra

286 defines Sāra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



287 illustrates Sāra.

288–289 Bhrāntimān

288 defines Bhrāntimān

289 illustrates Bhrāntimān. The author remarks that this Alaṁkāra is, according to some, the same as Mohopamā.

290–293 Saṁśaya

290 defines Saṁśaya.

291–292 illustrate Saṁśaya.

293 Defines Niścayānta Saṁśaya. The author remarks that, according to some, Saṁśaya and Niścayānta-Saṁśaya are the same as Saṁśayopamā and Nirṇayopamā respectively.

294-295 Ekāvalī

294 defines Ekāvalī

295 illustrates Ekāvalī.

296–297 Parikara.

296 Defines Parikara.

297 illustrates Parikara.

298–300 Parisaṁkhyā.

298 defines Parisaṁkhyā.

299-300 illustrate Parisaṁkhyā. The author remarks that it is, according to some, the same as Saniyama-śleṣa.

301–304 Praśnottara (three kinds)

301 defines Praśnottara.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



302 Vyakta–Praśnottara.

303 Vyaktapraśna-Gūḍhottara.

304 Vyaktagūḍhottara–Praśnottara.

305–308 Saṁkara.

305 defines Śaṁkara.

306-307 illustrate Saṁkara.

308 states that Saṁkara is two-fold : 1. When there exists the relation of "the principal and the subordinate" and 2. When there is "the state of equal prominence" between the Alaṁkāras constituting Saṁkara.

309–310 Conclusion.

309 The author states how he has completed this compendium of Alaṁkāras although their scope is vast.

310 The author expresses his benediction that the fame of King Nṛsiṁha ( Kāmirāja ) should continue to live through his Kāvya.

## CHAPTER X

**Nature of Doṣas and the Circumstances in which they turn out to be Guṇas**

1 A poem free from Doṣas leads to fame.

2–4 enumerate 15 Pada-doṣas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



5–33 define and illustrate these Padadoṣas.
5–6 Asamartha.
7 Śrutikaṭu.
8–9 Nirarthaka.
10–11 Avācaka.
12 Cyutasaṁskṛti.
13–14 Aprayukta.
15–16 Grāmya.
17–20 Aślīla (three kinds).
21–22 Neyārtha.
23 Kliṣṭa.
24–25 Sandigdha.
26–27 Anucitārtha.
28–29 Avimṛṣṭa-vidheyāṁśa.
30–31 Viruddhamatikṛt.
32–33 Apratīta.
34 points out how these Doṣas pertain also to parts of a word.
35–39 illustrate a few of these Doṣas pertaining to parts of a word.
40–43 enumerate 22 Vākya-doṣas.
44–45 Upahatalupta–visarga
46–50 Hatavṛtta
51–52 Garbhita
53–54 Saṁkīrṇa
55–56 Nyūnapada

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



57–58 Kathitapada
59–60 Prasiddhi-hata
61–63 Akrama
64–68 Visandhi
69–70 Pratikūla-varṇa
71–72 Asthānastha-pada
73–74 Asthānastha-samāsa
75–76 Adhikapada
77–78 Rasa- cyuta
79–80 Samāpta-punarātta
81–82 Anabhihita-vācya
83–84 Aprastutārtha
85–86 Amata-parārtha
87–88 Ardhāntaraika-vācaka
89–91 Bhagna–prakrama
92–94 Abhavanmata-yoga
95–96 Patatprakarṣa
97–100 enumerate 21 Artha-doṣas.
101–142 define and illustrate these Artha-doṣas
101–102 Apuṣṭa
103–104 Kaṣṭa
105–107 (ab) Sandigdha
107(cd)–108 Vyāhata
109–110 Grāmya
111–112 Duṣkrama
113–114 Vyarthīkṛta

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



115-116 Ahetu
117-118 Punarukta
119-120 Aślīla
121-122 Sākāṅkṣa
123-124 Prasiddhi-Viruddha
125-126 Vidyā-viruddha
127-128 Ukta-viruddha
129-130 Saniyama
131-132 Aniyama
133-134 Viśeṣa-parivṛtta
135-136 Aviśeṣa-parivṛtta
137-138 Vidhyanuvāda-vivṛtta
139-140 Tyakta-punaḥsvīkṛta
141-142 Sahacarabhinna
143-166 illustrate and explain how, in certain circumstances Pada-doṣas, Vākya-doṣas and Artha-doṣas turn out to be Guṇas. The circumstances in which Śrutikaṭu, Asamartha, Kliṣṭa, Neyārtha, Nirarthaka, Aślīla, Sandigdha Apratīta, Nyūnapada, Adhikapada Punarukta, Nirhetu ( Ahetu ) these Doṣas cease to be so and, in fact, turn out to be Guṇas.
167-176 Under the word Prasiddhi (occurring in the Prasiddhi-viruddha doṣa) are included other things also which are not found in



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.orgAcharya Shri Kailassagarsuri Gyanmandir



nature but are Prasiddha according to Kavi-samaya (poetic conventions).

177–180 enumerate Rasa-doṣas.

181–186 Rasābhāsa and Bhāvābhāsa.

187–190 illustrate Svaśabdagrahaṇa.

191 illustrates Kaṣṭa-Kalpanā.

192 illustrates Pratikūlavibhāvādi-grahaṇa.

193 The author here directs that the reader should refer to the poetic compositions for Rasa-Doṣas (those illustrated here and others mentioned in vv178-179 (viz, Punaḥ punaḥ dīptiḥ, Ākāśa (= Akāṇḍa) prathana Ākāśa (= Akāṇḍa) Cheda Aṅgasya ativistṛtiḥ, Aṅgino ananusandhānaṁ Prakṛti-viparyayaḥ Anaṅgasyābhidhānaṁ.

194–197 In conclusion, the author addresses King Kāmirāja in glowing terms and wishes him well.

■

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीअनन्तनाथाय नमः। निर्विघ्नमस्तु।

# वर्णगणफलनिर्णयो नाम

## प्रथमः परिच्छेदः

जयति संसिद्धकाव्यालापपद्माकरेऽयं
वरगुणयुतजीवन्मुक्तिपुंस (: प्रियो यः।
सुमधुमधु ) रवाणीसारनिक्वाणरम्यो
जिनपतिकलहंसश्चारुसंनीति[1]पक्ष्मा ॥ १ ॥
अमन्दानन्दसंदोहपीयूषरसदायिनीम्।
स्तवीमि शारदां दि(व्यां) [2]ज्ञानैकफलशालिनीम् ॥ २ ॥
समन्तभद्रादिमहाकवीश्वरैः
कृतप्रबन्धोज्ज्वलसत्सरोवरे।
लसद्रसालंकृतिनीरपङ्कजे
सरस्वती क्रीडति भावबन्धुरे ॥ ३ ॥
श्रीमद्विजय[3]कीर्तीन्दोः सूक्तिसंदोहकौमुदी।
[4]मदीयचित्तसंतापं हृत्वानन्दं [5]दद्यात्परम् ॥ ४ ॥
श्रीमद्विजयकीर्त्याख्यगुरुराजपदाम्बुजम्।
मदीयचित्तकासारे स्थेयात् संशुद्धधीजले ॥ ५ ॥
मलयानिलसंकाशो गुणसौरभवर्धकः।
संतापहृज्जनानन्दः सुजनो[6] जीवताच्चिरम् ॥ ६ ॥

---

१. वक्ष्य, २. ज्ञानफल°, ३. कीर्तीन्द्रोः, ४. मदीय च स्म, ५. ददातु, ६. देवता°।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणवर्मादिकर्नाटकवीनां सूक्तिसंचयः ।
वाणीविलासं[1] देयात्ते रसिकानन्ददायिनम् ॥ ७ ॥
राजनीतिमहाशास्त्रनिरूपितफलप्रदाम् ।
नानातटाककासारनदीवनविभूषिताम् ॥ ८ ॥
संदे ( व ) पुरसंकाशनानानगरभासुराम् ।
जिनराजमहाधर्मश्रावकोत्तमराजिताम् ॥ ९ ॥
अष्टादशमहाश्रेणीभूषितां श्रीमतीतराम् ।
पश्चिमार्णवपर्यन्तां दशां सर्वसुखप्रदाम् ॥ १० ॥
श्रीमद्भूरतराजेन्द्रनामचक्रधरोपमः ।
श्रीवीरनरसिंहाख्यबङ्गभू(मी)श्वरो महान् ॥ ११ ॥
पालयत्यमलां[2] बङ्गवाटीपुरसमन्विताम् ।
कादम्बवंशजनितानेकभूमीशपालिताम् ॥ १२ ॥
तस्यानुजो[3] गुणाधीशः पाण्डयबङ्गनरेश्वरः ।
सत्येन रामचन्द्रोऽभूद्धर्मेण भरतेश्वरः ॥ १३ ॥
रत्नत्रयमहाधर्मरक्षको राजशेखरः ।
महाकविजन[4] स्तूयमानसत्कीर्ति(ना)यकः ॥ १४ ॥
सोऽपि श्रीपाण्डयबङ्गोऽयं जिनपादाब्जषट्पदः ।
अनुक्रमागतां भूमिं पूर्वोक्तां रक्षति स्म वै ॥ १५ ॥
तस्य श्रीपाण्डयबङ्गस्य भागिनेयो गुणार्णवः ।
विट्ठलाम्बामहादेवीपुत्रो राजेन्द्रपूजितः ॥ १६ ॥
[5]श्रीकामिराजबङ्गोऽभून्नाम्ना नृपतिकुञ्जरः ।
वैरिसंदोहगन्धेभ[6]घटा(क)ण्ठीरवोपमः ॥ १७ ॥

---

१ देयांते, २. वङ्गवाडी: I have sanskritised as वङ्गवाटी, ३. गुणादी पाण्डच॰, ४. स्तूयःमानसत्कीर्ति ··यकः, ५. कामिराय: I have sanskritised as कामिराज throughout the text. ६. ॰घटा····ठिरवो ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमागतामिमां भूमिं पश्चिमाम्बोधिभूषिताम् ।
[१]श्रीकामिराजबङ्गेन्द्रः पालयत्यमलश्रियम् ॥ १८ ॥
[२]स राजा काव्यगोष्ठीषु सभाजनविभूषितः ।
अपृच्छद्द्वितयं नाम्ना कविताशक्तिभासुरम् ॥ १९ ॥
काव्यस्य लक्षणं किं वा वर्णशुद्धिश्च (की)दृशी ।
रसभावौ कथंभूतौ [३]नेतृभेदाश्च कीदृशाः ॥ २० ॥
कीदृश्यलंकृती रीतिः कीदृग्वृत्तिश्च कीदृशी ।
[४]कीदृग्दोषो गुणः कीदृक् पृच्छति स्मेति मां नृपः ॥ २१ ॥
इत्थं नृपप्रार्थितेन मयालंकारसंग्रहः ।
क्रियते सूरिणा नाम्ना शृङ्गारार्णवचन्द्रिका ॥ २२ ॥
अदोषः सगुणो रीतिवृत्तिशय्यारसान्वितः ।
सालंकारः सपाकश्च शब्दार्थरचनोत्तमः ॥ २३ ॥
समुद्रनगरीशैलसुधाकरदिवाकर– ।
(षड)र्तुजलकेलीनां वर्णनाभिरलंकृतः ॥ २४ ॥
[५]संभोगविप्रलम्भाभ्यां मधुपानैः कुमारकैः ( ? रतोत्सवैः ) ।
विवाहैर्मन्त्रदूताभ्यां प्रयत्नेन विभूषितः ॥ २५ ॥
संग्रामनायकैश्वर्यवर्णनाभिर्विभूषितः ।
मनोज्ञभावसंदर्भैः कवीश्वरनिरूपितः ॥ २६ ॥
धर्मार्थकाममोक्षाख्यसत्फलानां प्रकाशकः ।
महानु······························ ······· ॥ २७ ॥
[६]विधुप्रबन्धसंज्ञोऽयं बुधैः काव्यं प्रकीर्तितम् ।
रसभावज्ञलोकानां प्रमोदाय प्रकल्पते ॥ २८ ॥

---

१. श्रीकामीकाय°, २. स राजा कां···गोष्ठीषु । ३. ते त्रिभेदाश्च, ४. किंदृग्दोषो गु···णा किंदृकपृच्छति, ५. Could the line be : संभोग-विप्रलम्भाभ्यां कुमारोदयवर्णनैः ? ६. विधुप्रबन्धो यं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत् काव्यं त्रिविधं प्रोक्तं पद्यं गद्यं च मिश्रितम् ।
उक्तादिच्छन्दसा बद्धं पद्यकाव्यं निरूपितम् ॥ २९ ॥
गद्यकाव्यं तु वाक्यानां मूलालंकृतमीरितम्(?समुच्चय इतीरितम्)।
गद्यपद्योभयं प्रोक्तं मिश्रकाव्यं बुधोत्तमैः ॥ ३० ॥
उत्तमं मध्यमं प्रोक्तं जघन्यं त्रिविधं पुनः ।
प्रत्येकमिति तत् काव्यं नवधा संप्रवर्तते ॥ ३१ ॥
उत्तमं ध्वनिभिर्व्यक्तमव्यक्तं मध्यमं मतम् ।
ध्वन्यर्थशून्यं काव्यं तु जघन्यं परिकीर्तितम् ॥ ३२ ॥
आशीरलंकृतं वस्तुनिर्देशपरिभूषितम् ।
नमस्कृतिसमेतं वा तत् काव्यमुखमुच्यते ॥ ३३ ॥
एतत्काव्यमुखे वर्णगणशुद्धिः प्रकीर्त्यते ।
तया कवेर्नायकस्य जाघटीति महाशुभम् ॥ ३४ ॥
तदभावेऽनिष्टफलं कविनायकयोर्भवेत् ।
तस्माद्वर्णगणानां तु शुद्धिरुक्ता बुधैर्यथा ॥ ३५ ॥
अकारादिक्षकारान्ता वर्णास्तेषु शुभावहाः ।
केचित् केचिदनिष्टाख्यं वितरन्ति फलं नृणाम् ॥ ३६ ॥
ददात्यवर्णः संप्रीतिमिवर्णो मुदमुद्वहेत् ।
कुर्यादुवर्णो द्रविणं ततः स्वरचतुष्टयम् ॥ ३७ ॥
अपख्यातिफलं [1]दद्यादेचः सुखफलावहाः ।
ङञबिन्दुविसर्गास्तु पदादौ संभवन्ति नो ॥ ३८ ॥
कखगघाश्च लक्ष्मीं ते वितरन्ति फलोत्तमाम् ।
दत्ते चकारोऽपख्यातिं छकारः प्रीतिसौख्यदः ॥ ३९ ॥
मित्रलाभं जकारोऽयं[2] विधत्ते भीभृतिद्वयम् ।
झः करोति टठौ खेददुःखे द्वे कुरुतः क्रमात् ॥ ४० ॥

---

१. °द्यादेचः, २. विदत्तेभिमृत्त°।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोभाकरो डकारोऽयमशोभाफलदस्तु ढः ।
णकारो भ्रमणं दत्ते तकारः सुखदायकः ॥ ४१ ॥
[1]थो युद्धदो दधौ सौख्यफलौ नस्तु प्रतापदः ।
पो भयं फस्तु संतोषं ( ? फस्त्वसंतोषं ) बो मृत्युं
क्लेशनं तु भः ॥ ४२ ॥
दाहं क्रमान्मकारो विधत्ते श्रीकरस्तु यः ।
दाहकृद्रेफवर्णस्तु ल[2]वौ व्यसनदायकौ ॥ ४३ ॥
[3]शस्तनोति सुखं षस्तु [4]खेदं सस्तु सुखं क्रमात् ।
दाहदो हस्तु कवर्णो ददाति व्यसनं फलम् ॥ ४४ ॥
क्षस्तु सर्वसमृद्धीडयफलदानक्रियान्वितः ।
सम ( ? सर्व )वर्णफलं प्रोक्तमेवं प्रत्येकतः क्रमात् ॥ ४५ ॥
मुखे काव्यस्य वर्णानां संयोगस्त्यज्यतां बुधैः ।
शुद्धवर्णोऽन्यवर्णेन [5]युक्तो दुःफलदो भवेत् ॥ ४६ ॥
विषतामेति कर्पूरं तैलयुक्तं यथा भुवि ।
क्षकारस्तु प्रयोक्तव्यः [6]काव्यादौ सत्फलावहः ॥ ४७ ॥
वर्णानां शुद्धिरित्युक्ता गणशुद्धिः प्रकीर्त्यते ।
दीर्घोऽनुस्वारयुक्तो वा विसर्गान्तः स्वरस्तथा ॥ ४८ ॥
द्वित्वाक्षरसमेतो वा परतो गुरुरुच्यते ।
इतरो लघुरुक्तोऽयं स्वरः छन्दोविशारदैः ॥ ४९ ॥
स्वरो लघुरपि प्रोक्तो विकल्पेन गुरुर्बुधैः ।
पादान्ते यदि वर्तेत पद्यानां द्विविधात्मनाम् ॥ ५० ॥
गुरुणा लघुना ताभ्यां व्याप्ता वा गदिता गणाः ।
अष्ट वा पञ्च वा तेषां प्रत्येकं लक्षणं यथा ॥ ५१ ॥

---

१. छोयुद्दो ददौ, २. अतौ व्यसनदायकाः, ३. शस्तु हंति, ४. भेदं,
५. युक्तः दुःफलादो, ६. काम्यदौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिगुरुर्मगणः प्रोक्तस्त्रिलघुर्नगणो मतः ।
यगणो लघुमानादौ तगणोऽन्त्यलघुर्मतः ॥ ५२ ॥

रगणो लघुमान्मध्ये जगणो मध्यसद्गुरुः ।
सगणोऽन्त्यगुरुः प्रोक्तो भगणो गुरुरादितः ॥ ५३ ॥

अष्टावेते गणाः प्रोक्ताः प्रत्येकं त्रित्रिवर्णकाः ।
वर्णवृत्ते प्रयोक्तव्याः कवितानिपुणैर्बुधैः ॥ ५४ ॥

चतुर्मात्रागणाः पञ्च प्रत्येकं गदिता बुधैः ।
मात्रावृत्ते तु[१] ते ज्ञेयास्तेषां लक्षणमुच्यते ॥ ५५ ॥

द्विगुरुर्मगणः प्रोक्तो नगणश्च चतुर्लघुः ।
भगणो जगणो यश्च सगणो वर्णवृत्तवत् ॥ ५६ ॥

यरतास्तु न सन्त्यत्र पञ्चमात्रात्मकत्वतः ।
क्वचित् सन्ति विशेषोक्तेः संभवादिति बुध्यताम् ॥ ५७ ॥

यगणो जलरूपोऽयं धनकृद्रगणोऽनलः ।
भयदाहकरस्तस्तु गगनं श्रीकरो मतः ॥५८॥

भगणः [२]सुखकृत्सौम्यो जो [३]भानू रोगदायकः ।
वायव्यः सगणो दत्ते क्षयरूपं फलं सदा ॥५९॥

शुभदो मगणो भूमिर्नगणो गौर्धनप्रदः ।
एवं गणफलं प्रोक्तं शुभाशुभविभेदतः ॥६०॥

देवतावाचिशब्दानां भद्राद्यर्थप्रकाशिनाम् ।
शब्दानां निरवद्यत्वं काव्यादौ गणवर्णतः ॥६१॥

गणवर्णफलं प्रोक्तं समानं कविभिः कृते ।
काव्ये सर्वत्र बोद्धव्यं गद्यपद्योभयात्मके ॥६२॥

---

१. तु वद्ज्ञेया°, २. सुखकृत्साम्यो, ३. भानो ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं रम्यकवीश्वरैः कृतिमुखे निर्दिष्टनिर्दोषकै–
वर्णैश्चारुगणोत्करैर्विलसिते काव्ये सरोजाकरे।
श्रीमद्वीरनृसिंहरायनृपते कीर्तिस्त्वदीयामला
सत्यत्यागगुणोद्भवा विजयतां सा राजहंसीसमा ॥६३॥

इति परमजिनेन्द्रवदनचन्दिरविनिर्गतस्याद्वादचन्द्रिकाचकोरविजयकीर्तिमुनीन्द्रचरणाब्जचञ्चरीकविजयवर्णिविरचिते श्रीवीरनरसिंहकामिराजबङ्गनरेन्द्रशरदिन्दुसंनिभकीर्तिप्रकाशके श्रृङ्गारार्णवचन्द्रिकानाम्नि अलङ्कारसंग्रहे वर्णगणफलनिर्णयो नाम प्रथमः परिच्छेदः।

श्रीः ॥ श्री जिनाय नमः ॥

इति वर्णगणफलनिर्णयो नाम प्रथमः परिच्छेदः।

■

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# काव्यगतशब्दार्थनिश्चयो नाम

## द्वितीयः परिच्छेदः

प्रतिभाशक्तिसंपन्नो व्युत्पत्त्यभ्यासभूषितः ।
अष्टादशस्थलार्थानां वर्णनानिपुणः कविः ।।१।।
अथवा शक्तिनैपुण्यकविशिक्षात्रयान्वितः ।
रसभावपरिज्ञानगुणाढ्यः कविरुच्यते ।।२।।
त्यज्यते गृह्यते शब्दोऽर्थो वा तावत्पुनः पुनः ।
[1]येन यावद्रुचिः स्वस्य रौचिकः स कविर्भवेत् ।।३।।
शब्दडम्बरमात्रार्थी वाचिकः कविरुच्यते ।
अर्थवैचित्र्यमात्रार्थी सोऽयमार्थः कविर्भवेत् ।।४।।
शब्दार्थद्वयचित्रार्थी शिल्पिकः कविरुच्यते ।
शब्दार्थमृदुताकारी [2]मार्दवानुगनादभाक् ।।५।।
वाच्यवाचकसंबन्धिगुणदोषविदां वरः ।
महाकवीनां मार्गज्ञो नानाशास्त्रार्थकोविदः ।।६।।
विवेकीति कविः प्रोक्तो दिव्यालंकारयोजने ।
तत्परो भूषणार्थीति नाम्ना कविरुदाहृतः ।।७।।
इति सप्तविधाः प्रोक्ताः कवयः कविपुङ्गवैः ।
कविप्रयुक्तवाक्यानां चतुर्धार्थः प्रवर्तते ।।८।।
मुख्योऽर्थो लक्ष्यनामापि गौणाख्यो व्यङ्ग्यनामकः ।
महाकवीन्द्रैः सत्काव्ये प्रयुक्तोऽर्थश्चतुर्विधः ।।९।।

---

१. येन यावद्रुचिः स्त्रस्य स कवी रौचिको भवेत् । २. मूर्द्धवानुगना-दुभाक् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साक्षात् संकेतविषयो मुख्योऽर्थः प्रणिगद्यते।
जातिः क्रिया गुणो द्रव्यमिति सोऽपि चतुर्विधः ॥१०॥
अश्व-गो-गज-वृक्षादि-शब्दा जातिप्रकाशकाः।
क्रियाभिधायिका याति गच्छतीत्यादयो मताः ॥११॥
शुक्लकृष्णहरिद्रक्तकिर्मीरादिर्गुणो भवेत्।
दण्डिकुण्डलिचैत्रादि-द्रव्यमित्यभिधीयते ॥१२॥
मुख्यार्थे बाधिते मुख्यसंबन्ध्यर्थोऽपि लक्ष्यते।
[2]अन्यार्थत्वेन यः सोऽयं लक्षणेत्यभिधीयते ॥१३॥
लक्ष्यवाचकशब्दस्य लक्षणाशक्तयस्त्रिधा।
जहत्यजहती स्वार्थं जहत्यजहतीति च ॥१४॥
यत्र स्वार्थं परित्यज्य शब्दोऽन्यत्र प्रवर्तते।
तत्संबन्धयुते प्रोक्ता सा जहल्लक्षणा बुधैः ॥१५॥
[3]कौमुदं वर्धयत्यत्र राजा नीतिविदां वरः।
घोषो वसति गङ्गायामित्युदाहरणं मतम् ॥१६॥
अपरित्यज्य मुख्यार्थं शब्दोऽन्यत्र प्रवर्तते।
तत्संबन्धयुते यत्र सा जहल्लक्षणेतरा ॥१७॥
प्रविशन्ति महादुर्गं [4]कुन्ताश्चापानि शक्तयः।
खेटखड्गाश्च रक्षार्थमित्युदाहरणं स्मृतम् ॥१८॥
शब्दो जहाति मुख्यार्थं न जहात्यपि यत्र सा।
जहत्यजहती प्रोक्ता लक्षणा कविकुञ्जरैः ॥१९॥
व्रजन्ति शिबिका मार्गे व्रजन्ति च्छत्रिणोऽपि च।
व्रजन्त्यान्दोलिकाः प्रोक्तमित्युदाहरणं बुधैः ॥२०॥
[5]शिबिका-दोलिका-च्छत्रशब्दैः स्वार्थप्रकाशकैः।
अन्येषां शिबिकान्दोलच्छत्रित्वमिह लक्ष्यते ॥२१॥

१. किमारु०, २. मुख्यार्थत्वेन, ३. कामुदं, ४. शापानि ५. शिबिकां, दोलिकां छत्रीन्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुख्यबाधे निमित्ते च फले चारोप्यते बुधैः ।
योऽर्थोऽभेदेन भेदेन स गौणो विदुषां मतः ॥२२॥
सिंहो नृपतिरित्यत्र गौणोऽभेदेन संमतः ।
राजा सिंह इव प्रोक्तो भेदो गौणो बुधोत्तमैः ॥२३॥
मुख्यार्थाल्लक्ष्यतो गौणाद्भिन्नो योऽर्थः प्रतीयते ।
स व्यङ्ग्यो ध्वनिरित्युक्तः कलाशास्त्रविशारदैः ॥२४॥
कौमुदं वर्धयत्यत्र राजेत्युक्ते प्रतीयते ।
प्रजोपकारिता राज्ञः सा व्यङ्ग्य इति बुध्यताम् ॥२५॥
अभिधा लक्षणा गौणी व्यञ्जना च चतुर्विधा ।
शब्दानां शक्तिरित्युक्ता पुरातनकवीश्वरैः ॥२६॥
अभिधाशक्तिमाश्रित्य नानार्थान् व्यञ्जयन्ति ये ।
शब्दास्ते नियतार्थेषु नियम्यन्ति नियामकैः ॥२७॥
नियमाकरणे काव्येऽनिष्टार्थानां प्रतीतितः ।
असदर्थप्रसंगाख्यदोषदुष्टा कृतिर्भवेत् ॥२८॥
ते के नियामका ब्रूध्वमिति प्रश्ने नियामकाः ।
संयोगादय इत्युक्ता गुणशालिकवीश्वरैः ॥२९॥
संयोगविप्रयोगौ विरोधितासाहचर्यकालाश्च ।
अर्थः प्रकरणं लिङ्गं शब्दान्तरसंनिधिश्च सामर्थ्यम् ॥३०॥
औचित्यव्यक्तिदेशाश्च गदितास्तु स्वरादयः ।
कविप्रयुक्तशब्दानामर्थभेदप्रकाशकाः ॥३१॥
सचक्रो हरिरित्यत्र चक्रयोगात् प्रतीयते ।
अचक्रो हरिरित्यत्र तद्वियोगाच्च माधवः ॥ ३२॥
राजा कमलविरोधीत्युक्ते चन्द्रो विरोधतो ज्ञातः ।
अर्कः कुमुदविरोधीत्युक्ते तत एव कारणाद् भानुः ॥३३॥
जिष्णुभीमाविति प्रोक्ते साहचर्यात् परस्परम् ।
पार्थपार्थाग्रजौ ज्ञातौ कवितानिपुणैर्बुधैः ॥३४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भातीन्दीवरमित्युक्ते कालोऽर्थस्य प्रकाशकः ।
दिवसे यदि नीरेजं रात्रौ चेदुत्पलं स्मृतम् ॥३५॥
सप्ताङ्गभासुरो राजेत्यर्थो नृपतिबोधकः ।
अर्जुनः समरे पार्थज्ञानं प्रकरणादभूत् ॥३६॥
नरः कपिध्वज इति लिङ्गात् पार्थोऽवगम्यते ।
इन्द्रः शचीश इत्यन्यशब्दाद्वासवनिश्चयः ॥३७॥
नीलकण्ठो नरीनर्ति शक्तिवर्षर्तुबोधिका ।
[1]अत्रास्ते नृपतिर्ज्ञातमौचित्यात् सिंहविष्टरम् ॥३८॥
अब्जोऽब्जं राजतीत्युक्ते चन्द्रोऽम्भोजं प्रतीयते ।
पुंनपुंसकलिङ्गाख्यव्यक्तिभ्यां कविकुञ्जरैः ॥ ३९ ॥
गगने राजते राजा देशाच्चन्द्रो विनिश्चितः ।
गानस्वरादिरर्थस्य गमकोऽपि न काव्ययुक् ॥ ४० ॥
आदिशब्देन चेष्टादिर्गृह्यतेऽर्थप्रकाशकः ।
उदाहरणमेतस्य ज्ञातव्यं बुद्धिशालिभिः ॥ ४१ ॥
एवं शब्दगतार्थनिश्चययुतै [2]धीमत्कवीन्द्रैः कृते
काव्यव्योम्नि तिरस्कृतारिगुणतारालिप्रभे निर्मले ।
भो भो वीरनृसिंहरायनृपते ते सत्प्रतापो रविः
कुर्वन्वैरिनिकायकैरवगणम्लानिं सदा वर्तताम् ॥ ४२ ॥

इति परमजिनेन्द्रवदनचन्दिरविनिर्गतस्याद्वादचन्द्रिकाचकोरविजय-
कीर्तिमुनीन्द्रचरणाब्जचञ्चरीकविजयवर्णिविरचिते श्रीवीर-
नरसिंहकामिराजबङ्गनरेन्द्रशरदिन्दुसंनिभकीर्तिप्रकाशके
शृङ्गारार्णवचन्द्रिकानाम्नि अलंकारसंग्रहे काव्यगत-
शब्दार्थनिश्चयो नाम द्वितीयः परिच्छेदः ।

काव्यगतशब्दार्थनिश्चयो नाम द्वितीयः परिच्छेदः ।

---

१. अत्रासे नृपतिज्ञात°, २. धीवान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# रसभावनिश्चयो नाम

## तृतीयः परिच्छेदः

निरवद्यवर्णगणयुतमपि काव्यं निर्मलार्थशब्दयुतम् ।
निर्लवणशाकमिव तन्न रोचते नीरसं सतां मनसे ॥ १ ॥
अतः कारणतोऽस्माभिरुच्यते रसलक्षणम् ।
पूर्वशास्त्रानुसारेण भावभेदविशेषितम् ॥ २ ॥
चित्तस्य वृत्तिभेदो यः परिणामापराख्यकः ।
स्थिरत्वं प्राप्तवान् सोऽयं स्थायिभावो निगद्यते ॥ ३ ॥
रतिहासशोककोपोत्साहभयाख्यस्तथा जुगुप्साख्यः ।
विस्मयशमाभिधः सः स्थायिभावो हि नवभेदः ॥ ४ ॥
विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
बुध्यमानैस्तु सुव्यक्तः स्थायिभावो रसो भवेत् ॥ ५ ॥
एवं लक्षणयुक्तोऽयं रसो नवविधः स्मृतः ।
शृङ्गारो हास्यनामा च करुणाख्योऽपि रौद्रकः ॥ ६ ॥
वीरो भयानको यश्च बीभत्सोऽद्भुत इत्यपि ।
शान्तनामा च ते सर्वे रसभेदा निरूपिताः ॥ ७ ॥
भावैश्चतुर्भिः पूर्वोक्तैर्व्यज्यमाना रतिर्यदा ।
तदा कवीन्द्रैः शृङ्गाररस इत्यभिधीयते ॥ ८ ॥
एवमन्ये स्थायिभावा भावैर्व्यक्ता रसाः स्मृताः ।
स्वर्णं वह्नियुतं याति रसभावं यथा भुवि ॥ ९ ॥
काव्येषु ते विभावाद्याः श्रूयमाणा रसं नृणाम् ।
श्रोतॄणां पोषयन्त्यत्र रसभावार्थवेदिनाम् ॥ १० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृश्यमाना नाटकेषु ते भावा जनयन्त्यलम् ।
प्रेक्षकाणां रसं सर्वं नाटयशास्त्रार्थवेदिनाम् ॥ ११ ।
भुज्यमानाश्च भोक्तृणां ते रसं पोषयन्त्यलम् ।
भावयन्ति रसं ये च ते भावा गदिता बुधैः ॥ १२ ॥
भावाश्चतुर्विधाः प्रोक्ताः कविताग़ुणशालिभिः ।
विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ॥१३॥
भावयन्ति विशेषेण ये रसं ते विभावकाः ।
आलम्बोद्दीपनत्वेन ते विभावा द्विधा मताः ॥१४॥
आलम्ब्य यं रसोत्पत्तिः सोऽयमालम्बनो मतः ।
उद्दीप्यते रसो येन स चोद्दीपनसंज्ञकः ॥१५॥
भावका रसमुत्पन्नं [1]चित्तस्थं भावयन्ति यैः ।
भावैस्ते गदितास्सद्भिरनुभावाश्शरीरजाः ॥१६॥
रसिकानां मनोवृत्तिः सत्त्वमित्यभिधीयते ।
सत्त्वसंजनिता भावाः सात्त्विकाः परिकीर्तिताः ॥१७॥
स्वेदकम्पनरोमाञ्चलयस्तम्भविवर्णताः ।
विकारस्वरता चाश्रु प्रणीतं सात्त्विकाष्टकम् ॥१८॥
स्थायिभावार्णवे भावा संचरन्त्यूर्मिसंनिभाः ।
ये तेष्वनियता भावा व्यभिचार्यभिधानकाः ॥१९॥
सशङ्कौ ग्लानिनिर्वेदौ जाड्यहर्षौ धृतिश्रमौ ।
दैन्यौग्र्यत्रासचिन्तेर्ष्यामर्षगर्वमदाः स्मृतिः ॥२०॥
मरणं सुप्तिनिद्रावबोधव्रीडाविषादकाः ।
व्याध्यपस्मारचापल्यमतिमोहौत्सुक्यास्तथा ॥२१॥
अवहित्थालस्यवेगौ तर्कोन्मादौ कवीश्वरैः ।
एते संचारिभावा हि त्रयस्त्रिंशत्प्रकीर्तिताः ॥२२॥

१. चितस्य सा भवंति यैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृश्यत्वाद् रसभावानां नटे काल्पनिको रसः ।
सामाजिके तात्त्विकस्तु रसो निजरसस्मृतेः ॥२३॥
भुवने रसिका लोका रसान् स्वाभाविकानलम् ।
भुञ्जते निजकर्मानुसारेण बहुधा सदा ॥२४॥
रसानामिति सर्वेषां सामग्री गदिता मया ।
शृङ्गाररससामग्री विशेषेण निरूप्यते ॥२५॥
आलम्बनविभावोऽत्र शृङ्गाराख्यरसे स्मृतः ।
कान्तायाः कामुको लोके कामुकस्य तु कामिनो ॥२६॥
वसन्तोद्यानकासारशुकध्वनिपिकस्वराः ।
शिखिताण्डवजीमूतध्वनिहंसविकूजनम् ॥२७॥
चक्रवाकरतिक्रीडाचञ्चरीकालिगुञ्जनम् ।
मलयानिलसंचारश्चन्द्रतापविलासनम् ॥२७॥
इन्द्रगोपस्य पतनं चन्दनादिविलेपनम् ।
उद्दीपनविभावोऽत्र शृङ्गारे ज्ञायतां बुधैः ॥२९॥
अनुभावास्तु शृङ्गारे कामुकस्याङ्गसंभवाः ।
कामुकीकायजाता वा विकाराः परिकीर्तिताः ॥३०॥
[1]अपाङ्गलोकनं प्रीतिकरसूक्तिविलासनम् ।
भ्रूलताक्षेपणं कर्णपूरोत्पलविवाहनम् ॥३१॥
रशनाबन्धनं वामचरणाघातनं स्मितम् ।
नीवीविस्रंसनं नाभिजघनोरुविमर्शनम् ॥३२॥
आलिङ्गनं कुचद्वन्द्वविमर्दनरतिक्रिये ।
एतेऽनुभावाः कथ्यन्ते शृङ्गारे कविकुञ्जरैः[2] ॥३३॥
कान्ताकामुकयोरत्र दर्शने स्पर्शनेऽथवा ।
सात्त्विकाः स्वेदरोमाञ्चवैवर्ण्यस्तम्भनादयः ॥३४॥

---

१. असांगलोकनं, २. मञ्जरैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योज्याः संचारिभावाश्च शृङ्गारेऽत्र विशारदैः ।
ग्लानिनिर्वेदनिद्रावबोधशङ्कामदादयः ।।३५।।
सामग्रीमवलम्ब्येमां जातः शृङ्गारनामकः ।
संभोगो विप्रलम्भश्च द्विविधो रस उच्यते ।।३६।।
कान्ताकामुकयोः सूक्तिविलासस्पर्शनादिभिः ।
मिथःसंबन्धरूपोऽत्र संभोगः कथ्यते बुधैः ।। ३७ ।।

अस्योदाहरणम्—

जातीकन्दुकताडनं सरसहुंकारस्वरोल्लासनं
काञ्चीभूषणबन्धनं कृतककोपाविद्धकेशग्रहः ।
भ्रूविक्षेपणवर्जनं कपटरम्याक्रोशनं शासनं
श्रीरायक्षितिपस्य मोहनकरं कान्ताकृतं चेष्टितम् ।। ३८ ।।
प्रच्छन्नो वा प्रकाशो वा संभोगो द्विविधो मतः ।
प्रकाशो गणिकास्त्रीणामन्यस्त्रीणां परो भवेत् ।। ३९ ।।
पूर्वानुरागो मानात्मा प्रवासः करुणाभिधः ।
चतुर्धा विप्रलम्भः स्याद् वक्ष्यते तन्निदर्शनम् ।। ४० ।।
संभोगविप्रलम्भौ तौ कान्ताकामुकयोरिह ।
संयुक्तायुक्तयोर्वाच्यौ यथासंख्यं बुधोत्तमैः ।। ४१ ।।
कान्तायाः कामुकस्यापि रत्युत्कर्षेण भाविताः ।
अवस्था दश वर्तन्ते तासामुद्देशलक्षणे ।। ४२ ।।
नयनप्रीतिः सक्तिः मनसः संकल्पजागरौ तनुता ।
विषयद्वेषो लज्जाविनाशनं मोहमूर्च्छने मरणम् ।। ४३ ।।
रमणीं रमणो यत्र रमणी रमणं भृशम् ।
द्रष्टुमिच्छति सा प्रोक्ता चक्षुःप्रीतिर्दशा बुधैः ।। ४४ ।।
कादम्बनाथ रमणी रतिनाथवश्या
सौधाग्रवर्तिमणिनिर्मितविष्टरस्था ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाह्यालिभूमिगतजातितुरङ्गमाग्रा-
रूढं भवन्तमतिचारु विलोकते स्म ॥ ४५ ॥
रमण्या रमणस्यापि यत्र चिन्ता पुनः पुनः ।
प्रतिकृत्यादिना तेन सा मनःसक्तिरुच्यते ॥ ४६ ॥
कादम्बक्षितिनाथ कामवशगारामं गता कामिनी
दृष्ट्वा पल्लवमञ्जरीं सरसिजं नीलोत्पलं मल्लिकाम् ।
भृङ्गीं कोमलचारुकीरवचनं सत्कोकिलानां स्वरं
त्वां पुष्पास्त्रसमं मुहुर्मुहुरलं संचिन्त्य लीनाभवत् ॥ ४७ ॥
मनोरथयुतस्वान्ते कान्तायाः कामुकस्य वा ।
प्राप्तिसंकल्पनं यत्र स संकल्पो मतः सताम् ॥ ४८ ॥
कादम्बनाथमदनं निजचित्तगेहे
कृत्वा मनोजधरणीश्वरराज्यलक्ष्मीः ।
आलिङ्गनं मधुरचुम्बनमङ्घ्रिघातं
संकल्प्य भावरतिमेति वियुक्तकान्ता ॥ ४९ ॥
यत्र कान्तस्य कान्ताया अलाभे तस्य चिन्तनम् ।
तस्या वा चिन्तनं नित्यं स जागर इति स्मृतः ॥ ५० ॥
कादम्बक्षितिनायकस्य विरहे तच्चिन्तया नायिका
संयुक्ता दरनिद्रयापि रहिता चन्द्रातपैः पीडिता ।
कीरोक्त्या कलकण्ठमोहनरवैर्भृङ्गीकदम्बस्वनै-
रुद्यानैः शिखिनां विलासघ[1]टनैर्जागर्ति मोमुह्यते ॥ ५१ ॥
पत्युर्वा नायिकाया वा प्राप्त्यभावात्कृशीकृता ।
यत्र ज्वरेण कामस्य तनुः स्यात्तनुता मता ॥ ५२ ॥
आयल्लके नृपतिकुञ्जररायबङ्ग
कामज्वरेण कृशतां मृगलोचनागात् ।

---

१. बटनैः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चान्द्री कलेव रमणी तव सा विभाति
नीरेजनालगततन्तुरिवाथवालम् ।। ५३ ।।
यत्र न क्षमते स्त्री वा पतिर्वा कामवर्धनम् ।
भावं न रोचते ताभ्यां विषयद्वेषकः स हि ।। ५४ ।।
कामाग्निप्रशमार्थमालिनिकरैरानीयमानं सती
चूताशोकलसत्प्रवालनिचयं दृष्ट्वा भयं गच्छति ।
बुद्ध्या मन्मथबाणजालमिति सा चान्द्रीं मरीचिं मनो-
भ्रान्त्याकायजमल्लिकाशर इति श्रीरायपुष्पायुध ।।५५।।
अदृष्ट्वा गौरवं यत्र मानं त्यजति नायिका ।
नायको वा त्रपानाशः कथितो रसिकैः स च ।। ५६ ।।
मन्दानिलेन मकरन्दरसेन मत्त-
भृङ्गीस्वरेण शुककोकिलनिःस्वनेन ।
चन्द्रातपेन शिखिताण्डवडम्बरेण
त्वां यातुमिच्छति सती विमदा नृपेन्द्र ।। ५७ ।।
यत्र पत्युः स्त्रिया वा वा चित्तोन्मादो भ्रमादसौ ।
मोह इत्युच्यते सद्भिः कलाशास्त्रविशारदैः ।। ५८ ।।
चन्द्रातपं पिबति चुम्बति पल्लवालिं
चन्द्रोदये निजपदेन निजाकृतिं सा ।
संताडयत्युरुगुणं सहकारभूजं
श्लिष्यत्यहो तव सती भ्रमतो नरेन्द्र ।। ५९ ।।
यत्र कामस्य संतापात् कामिनी रमणोऽथवा ।
न जानाति कमप्यर्थं सा मूर्च्छा गदिता बुधैः ।। ६० ।।
पुष्पास्त्रबाणपतनं क्षमते न सोढुं
या सा सती तव वियोगवशात् प्रयान्ती ।
मूर्च्छां पटे लिखितमन्मथकामिनीव
भात्यद्य तां मदनराज नृपेन्द्र रक्ष ।। ६१ ।।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्रियते यत्र रमणी रमणो वाप्यलाभतः ।
द्वयोरन्यतरस्यात्र मरणं तत् प्रकीर्तितम् ॥ ६२ ॥
कादम्बनाथ तव पुण्यफलं किमत्र
तस्याः पुरातनसुकर्मफलं किमत्र ।
कामस्य बाणनिवहो दशमीमवस्थां
तां नायिकां नयति नो खलु रक्ष रक्ष ॥ ६३ ॥
ज्ञातभावचतुष्केण नीयते व्यक्तरूपताम् ।
हासाख्यस्थायिभावो यो हास्यनामा रसो मतः ॥ ६४ ॥
आलम्बनविभावोऽत्र रसे हास्ये मतो बुधैः ।
विदूषकजनो निन्द्यपदार्थनिवहोऽथवा ॥ ६५ ॥
विदूषकस्य भाषा वा तदाकारस्य विक्रिया ।
उद्दीपनविभावोऽत्र निन्द्यदोषगणोऽथवा ॥ ६६ ॥
चक्षुर्विकाशो देहस्य चलनादी [1]रसाच्च ये ।
रसभोक्तृनरे प्रोक्ता अनुभावा विशारदैः ॥ ६७ ॥
विस्वरत्वाश्रुवैवर्ण्यस्वेदादिः सात्त्विको मतः ।
औत्सुक्यगर्हचापल्यश्रमाः संचारिणो मताः ॥ ६८ ॥
उत्तमो मध्यमो लोके जघन्यस्त्रिविधो मतः ।
हास्यनामरसस्तत्र स्मितं हसितमुत्तमे ॥ ६९ ॥
ततो विहसितं मध्ये तथोपहसितं मतम् ।
[2]अन्त्येऽवहसितं चात्र रसेऽतिहसितं मतम् ॥ ७० ॥
विकसितगण्डं त्वीषल्लक्ष्यदन्तं मृदुस्वनम् ।
शिरःकम्पं साश्रुकम्पं विक्षिप्ताशेषदेहकम् ॥ ७१ ॥
एतेषां लक्षणं प्रोक्तं यथासंख्यमितः परम् ।
उदाहरणमेतस्य रसस्य प्रोच्यते मया ॥ ७२ ॥

---

१. रसादये । २. अन्त्येन हसितं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीरायक्षितिनायकस्य समरे तां वैजयन्तीं परे
दृष्ट्वा भीतिवशात् पतन्ति कतिचिद्धावन्ति मूर्च्छन्ति च।
तां दृष्ट्वा स्मयते हसन्ति विहसन्त्यन्ये परे चेतरे
केचिच्चोपहसन्ति चावहसनं कुर्वन्ति हासं परम् ॥ ७३ ॥
शोकाख्यस्थायिभावो यो व्यक्तो भावचतुष्कतः ।
करुणाख्यरसः सोऽत्र प्रोच्यते कविपुंगवैः ॥ ७४ ॥
इष्टानिष्टविनाशाप्तिजातत्वात् करुणो द्विधा ।
नष्टं वानिष्टयुक्तं वा वस्त्वालम्बनमुच्यते ॥ ७५ ॥
स्वजनाक्रन्दनं बन्धुदर्शनादि निरूप्यते ।
उद्दीपनोऽनुभावस्तु निःश्वासरुदितादिकः ॥ ७६ ॥
विस्वरत्वाश्रुपातादिः सात्त्विको व्यभिचारिणः ।
विषादबाध्यदीनत्वमृतिचिन्तादयः स्मृताः ॥ ७७ ॥
कादम्बक्षितिपेन भीकरमहासंग्रामभूमौ हतं
श्रुत्वा वैरिगणं तदीयवनिताः शोकाब्धिपारं गताः ।
हारालम्बिमनोज्ञमौक्तिकगणं नीरेजरागव्रजं
रायक्ष्मापतिकीर्तिविक्रमसमं मुञ्चन्ति दिङ्मण्डले ॥७८॥
रायक्ष्मापतिना भयंकरमहायुद्धे विपक्षव्रजं
जित्वानीय सश्रृङ्खलं जडमिमं कारागृहे बन्धितम् ।
श्रुत्वा तद्वनिताः परां शुचमिताः केशावलिं श्यामलां
श्रीरायस्य कृपाणवल्लिसदृशीं मुञ्चन्ति मूर्च्छन्ति च ॥७९॥
क्रोधाख्यस्थायिभावोऽयं व्यक्तो भावचतुष्टयात् ।
रौद्रः सोऽपि रसो द्वेधा मात्सर्यद्वेषजन्मतः ॥ ८० ॥
आलम्बनविभावोऽस्य मात्सर्यद्वेषगोचरः ।
उद्दीपनस्तु तद्भाषा तच्चेष्टादिक उच्यते ॥ ८१ ॥

---

१. हतादिः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुभावस्तु विक्षेपो भ्रुवां लोचनरक्तता ।
ऊरुहस्तोष्ठचलनप्रमुखः परिकीर्तितः ॥ ८२ ॥
सात्त्विकः स्वेदरोमाञ्चविस्वरत्वादिको मतः ।
संचारी द्वेषगर्वोग्रभावादिः प्रणिगद्यते ॥ ८३ ॥
श्रीरायक्ष्मापशक्तिं पटुतरसमरे भूरिदोर्दण्डचार्वीं
ज्ञात्वा वैरिक्षितीशा अपि निजहृदयोपात्तमात्सर्यदोषाः ।
अस्माकं साम्यभाजो नहि नहि भुवने कर्णपार्थादयो वा
मूले तिष्ठन्तु के वा समरधुरसहा गर्वमेनं वदन्ति ॥८४॥
घोरश्रीयुद्धरङ्गे समरदुरसहं वैरिभूपालवर्गं
दृष्ट्वा कादम्बनाथो दिशि दिशि विकिरन् कोपवह्निस्फुलिङ्गम् ।
कल्पान्तश्राद्धदेवः प्रकटितमहिमा शत्रुभूमीश्वराणां
संहारं साधु कृत्वा विलसति भुवने युद्धरङ्गत्रिणेत्रः ॥ ८५ ॥
उत्साहस्थायिभावोऽत्र व्यक्तो वीररसो मतः ।
भावैश्चतुर्भिः स रसः त्रिविधः पुनरुच्यते ॥ ८६ ॥
दानवीरदयावीरयुद्धवीरप्रकारभाक् ।
सत्पात्रं दीनपुरुषो वैरिलोको यथाक्रमम् ॥ ८७ ॥
आलम्बनविभावस्तूद्दीपनः क्रमतो मतः ।
दानस्तवनदीनोक्तियुद्धभेरिस्वरादिकः ॥ ८८ ॥
अनुभावः क्रमाच्चित्तप्रसत्तिः शस्त्रसंग्रहः ।
सात्त्विको रोमहर्षादिः संचारी प्रोच्यतेऽधुना ॥ ८९ ॥
गर्वहर्षमहाक्रोधदृत्यादिर्बहुभेदभाक् ।
बुध्यतां कविताप्रौढिगुणभाग्भिः कवीश्वरैः ॥ ९० ॥
यद्दानाद्धनदा भवन्ति कतिचित् केचिच्च कर्णाः परे
जायन्ते सुरनायकास्त्रिभुवनं व्याप्नोति कीर्तिः परा ।
कल्पानोकहकर्णरामनृपतीन् हित्वा यशस्कामिनी
यं भूपं श्रयते स रायनृपतिः श्रीदानवीरो भुवि ॥ ९१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीनानाथजनान् विलोक्य हृदये दुःखाग्निदग्धान् बहून्
कारुण्यामृतभासुरः परिलसद्दानेन मीनेन वै ।
रक्षं रक्षमतीव याति न हि यस्तृप्तिं परां चेतसि
श्रीरायक्षितिनायकः स भुवने कारुण्यवीरो भवेत् ॥ ९२ ॥
यं दृष्ट्वा प्रलयान्तभैरवमिमं दोर्दण्डचण्डं नृपं
वैरिक्ष्मापगणा भयज्वरमिता धावन्ति मूर्च्छन्ति च ।
नीरं यान्ति तरुं श्रयन्ति तृणकं चुम्बन्ति वल्मीककं
चारोहन्ति स रायवङ्गनृपतिः संग्रामवीरो भुवि ॥ ९३ ॥
भयाख्यस्थायिभावोऽत्र व्यक्तो भावचतुष्टयात् ।
भयानकरसस्तस्यालम्बभावः प्ररूपितः ॥ ९४ ॥
निर्घातव्याघ्रसर्पारिभल्लूकेभहरिव्रजः ।
[1]उद्दीपनो घनस्तस्य गर्जनादिः प्रकीर्तितः ॥ ९५ ॥
अनुभावोऽत्र वैवर्ण्यस्वेदकम्पादिको मतः ।
स एव सात्त्विको भावः संचारी तु प्रकीर्त्यते ॥ ९६ ॥
संभ्रमत्रासमोहोरुदीनभावादिभेदभाक् ।
एते चतुर्विधा भावा योज्याः काव्यविशारदैः ॥ ९७ ॥
युद्धे रायनरेन्द्रहस्तकलितं खड्गोरुकालोरगं
दृष्ट्वा भीतिवशाद्विपक्षधरणीनाथाः प्रकम्पं गताः ।
धावन्तो गिरिगह्वरास्थितमहाघोरान्धकारं श्रिता-
स्तांस्तत्रापि भयं नयन्ति वनिता दिव्याङ्गसत्कान्तयः ॥ ९८ ॥
जुगुप्सास्थायिभावोऽयं व्यक्तो बीभत्सनामकः ।
रसो जुगुप्स्यवैराग्यहेतुजन्मा द्विधा मतः ॥ ९९ ॥
आलम्बनविभावोऽत्र जुगुप्स्योऽर्थो मनःप्रियः ।
उद्दीपनस्तु दुर्गन्धदुष्टदोषादिको मतः ॥ १०० ॥

---

१. उद्दीपनः हन° ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.orgAcharya Shri Kailassagarsuri Gyanmandir



अनुभावोऽस्य वक्त्रस्य नासिकायाश्च कूणनम् ।
वेगप्रभृतिकं चोक्तं पुलकादिस्तु सात्त्विकः ॥ १०१ ॥
निर्वेगोद्वेगकोपादिः संचारी परिकीर्त्यते ।
इति भावचतुष्कं तु योज्यं सत्कविकुञ्जरैः ॥ १०२ ॥
श्रीरायक्षितिपेन घोरसमरे जित्वा विनिःकासिताः
देशाद् वैरिनृपा निजेष्टरमणीयुक्ताश्चरन्तोऽनिशम् ।
सर्वाङ्गव्रणपूयजर्जरितकाष्टाङ्गा जुगुप्स्या जना-
वर्तन्तेऽ गतिका दरिद्रमनुजा भिक्षाटने तत्पराः ॥१०३॥
श्रीरायबंगभूपतिनिर्जितशात्रवगणस्य कष्टं वै ।
दृष्टवते लोकेऽसौ जनाय किं रोचते संपत् ॥ १०४ ॥
विस्मयस्थायिभावस्तु भावैर्व्यक्तोऽद्भुतो मतः ।
जनचेतश्चमत्कारि वस्त्वालम्बनमुच्यते ॥ १०५ ॥
अहोवचनमित्यादिर्भावस्तूद्दीपनो मतः ।
अनुभावस्तु दृष्ट्यास्यकपोलस्फुरणादिकः ॥ १०६ ॥
रोमाञ्चस्वेदभावादिः सात्त्विकः परिकीर्तितः ।
हर्षसंभ्रमभावादिः संचारी तु निगद्यते ॥ १०७ ॥
श्रीरायक्षितिपस्य राजसदनं तत्राद्भुतां सत्सभां
तत्र स्थापितविष्टरं रुचिकरं तत्र स्थितं भूपतिम् ।
तद्देहं तदनूनभूषणगणं तत्कान्तिजालं परं
तद्व्याप्तिं जनता विलोक्य परमां चित्रीयते संततम् ॥१०८॥
शमाख्यस्थायिभावोऽयं विभावादिचतुष्टयात् ।
व्यक्तः शान्तरसः प्रोक्तो गुणशालिकवीश्वरैः ॥ १०९ ॥
आलम्बनविभावस्तु पञ्चानां परमेष्ठिनाम् ।
स्वरूपं निजरूपं वा निश्चयव्यवहारतः ॥ ११० ॥
उद्दीपनास्तु स्याद्वादवेदिसंभाषणादयः ।
सर्वत्र समभावादिरनुभावः प्रकीर्तितः ॥ १११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुलकस्तम्भभावादिः सात्त्विकः परिकीर्तितः ।
संचारिभावो निर्वेदधृतिमत्यादिको मतः ॥ ११२ ॥
श्रीरायक्षितिनाथपालितमहादेशे कवीन्द्रस्तुते
योगीन्द्रा जिनतत्त्वबोधमहिताः सम्यक्त्वरत्नाकराः ।
रागद्वेषविमुक्तशान्तमनसश्चारित्रपूज्याङ्गका-
ध्यायन्तः परमात्मतत्त्वममलं श्राम्यन्ति सौख्यास्पदम् ॥११३॥
रसलक्षणमत्रोक्तं रसभेदोऽपि निश्चितः ।
स्थायिभावादिसामग्री रसानां कथिता मया ॥ ११४ ॥
इतः परं रसानां तु वर्णस्तदधिदेवता ।
कार्यकारणभावश्च विरोधोऽप्यविरोधिता ॥ ११५ ॥
निरूप्यते जगत्ख्यात कादम्बाम्बुधिचन्दिर ।
शृणु राय महीनाथ काव्यगोष्ठिविशारद ॥ ११६ ॥
स्यादिन्दीवरवर्णस्तु रसश्शृङ्गारनायकः ।
तस्याधिदेवता लोके वासुदेवः प्रकीर्त्यते ॥ ११७ ॥
सुधाधवलवर्णः स्याद्रसो हास्याभिधानकः ।
लोकेऽधिदेवता तस्य विघ्नराजो निरूपितः ॥११८॥
कषायवर्णतां याति करुणाख्यो रसो भुवि ।
तस्याधिदेवता प्रोक्ता श्राद्धदेवः कवीश्वरैः ॥११९॥
जपाकुसुमवद् रक्तवर्णो रौद्रो रसो मतः ।
तस्याधिदेवता लोके रुद्रनामा निरूप्यते ॥१२०॥
गौरवर्णेन बाभाति लोके वीररसोऽनिशम् ।
तस्याधिदेवता लोके शतमन्युः प्ररूप्यते ॥१२१॥
भयानकरसोऽप्यत्र धूम्रवर्णः प्रकथ्यते ।
तस्याधिदेवता लोके महाकालोऽनुमन्यते ॥१२२॥
रसो बीभत्सनामा च नीलजीमूतसंनिभः ।
तस्याधिदेवता लोके नन्दिनामा निबुध्यताम् ॥१२३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्भुताख्यरसो लोके हेमवर्णेन राजते ।
तस्याधिदेवता लोके विधाता प्रणिगद्यते ॥१२४॥
शान्तनामरसो लोके शुद्धस्फटिकवर्णभाक् ।
तस्याधिदेवता लोके परब्रह्म प्रकाश्यते ॥१२५॥
शृङ्गाराज्जन्म हास्यस्य करुणो रौद्रजन्मभाक् ।
अद्भुतो जायते वीराद् बीभत्साच्च भयानकः ॥१२६॥
इतरस्माद्रसाज्जन्म नास्ति शान्तस्य शान्तता ।
इतरो वा रसो लोके जायते न कदाचन ॥१२७॥
शृङ्गारस्य विरोधी हि बीभत्सः कथ्यते बुधैः ।
भयानकविरोधी तु लोके [1]वीररसो भवेत् ॥१२८॥
अद्भुतो रौद्रवैरी तु करुणो हास्यबाधकः ।
शान्तस्य केनचिन्नास्ति मित्रत्वं वा विरोधिता ॥१२९॥
नानाभावमनोज्ञभावविलसत्तारावलीराजिते
नानारम्यरसौघचारुतरसज्ज्योत्स्नावलीभासिते ।
सत्काव्ये गगने नृसिंहनृपते कादम्बवंशाम्बुधे
भो भो धीर भवान् मनोज [2]विलसत्कीर्तिश्च ते वर्धतात् ॥१३०॥

इति रसभावनिश्चयनामा तृतीयः परिच्छेदः ।

१. विव्ररसो । २. °विलसत्कीर्ती च रुद्रायतां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# नायकभेदनिश्चयो नाम

## चतुर्थः परिच्छेदः

गुण्यभावे गुणो नास्ति यद्वन्नेतुरसंभवे।
रसभावा जगत्यत्र संभवन्ति कदापि न ॥१॥
यतस्ततो नायकस्य नायिकायाश्च लक्षणम्।
तद्भेदाश्च निरूप्यन्ते तन्निश्चयफलार्थिनाम् ॥२॥
जनानुरागः प्रियवादिभावो वाग्मित्वशौचे विनयः स्मृतिश्च।
कुलीनतास्थैर्यदृढत्वमाना माधुर्यशौर्ये नवयौवनं च ॥३॥
उत्साहो दक्षता बुद्धिस्त्यागस्तेजः कला मतिः।
धर्मशास्त्रार्थकारित्वं प्रज्ञा नेतृगुणा इमे ॥४॥
एतद्गुणविशिष्टोऽयं नायकः कथ्यते बुधैः।
स नायकः पुनः प्रोक्तश्चातुर्विध्ययुतो भवेत् ॥५॥
धीरोदात्तस्तथा धीरलालितो धीरशान्तकः।
धीरोद्धत इति ख्याताश्चत्वारो नायका भुवि ॥६॥
क्षमासामर्थ्यगाम्भीर्यदयागुणविराजितः।
आत्मश्लाघामानशून्यो धीरोदात्तो मतः सताम् ॥७॥
राजसर्वज्ञकल्पोऽयं रायबङ्गमहीपतिः।
महासमुद्रदेशीयो भूमिदेश्यो विराजते ॥८॥
भोगे कलायां लोलो यश्चिन्तातीतसुखोदयः।
मन्त्र्यर्पितात्मसिद्धिश्च स्याद्धीरललितो मृदुः ॥९॥
श्रीरायबङ्गरमणो निजकामिनीना-
मालोकनं दृढतरं परिरम्भणं च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाणीविलासमधरामृतचारुपानं
कुर्वन् महारुचिरसौधतले सदास्ते ॥१०॥
विवेकशौचसौभाग्यसुप्रसन्नत्वभूषितः ।
विलासरसिको धीरशान्त इत्युच्यते बुधैः ॥११॥
कादम्बनाथ परिपालितरम्यराज्ये
केचिद् विलासरसिकास्सुभगाः प्रसन्नाः ।
नित्यं विवेकगुणभासुरमूर्तयस्ते
स्वेष्टाङ्गनासु कमनीयतरा रमन्ते ॥१२॥
मायामात्सर्यचण्डत्वचलचित्तसमन्वितः ।
आत्मस्तुतिपरो मानी धीरोद्धत इतीरितः ॥१३॥
सप्ताम्भोनिधिपानकं कुलगिरिव्रातस्य संचालनं
दिग्दन्तिव्रजकम्पनं गगनतारानीकनिस्फालनम् ।
एषामात्मविलासनं प्रकटितं तेऽमी वयं दुर्दमा
इत्येवं वदतो रिपूञ्जयति तान्[१] श्रीरायभूमीश्वरः ॥१४॥
चत्वारो नायका एते रसेषु नवसु क्रमात् ।
अवस्थाभेदतः सर्वे वर्तन्ते गुणशालिनः ॥१५॥
एषां चतुर्णा[२] नेतॄणां धीरोदात्तादिभेदिनाम् ।
शृङ्गाराख्यारसे प्रोक्ता प्रत्येकं चतुरात्मता ॥१६॥
अनुकूलः शठो धृष्टो दक्षिणो नायका मताः ।
शृङ्गाराख्यरसे सद्भिश्चत्वारो गुणराजिताः ॥१७॥
एकस्यां नायिकायां यः सक्तचित्तो न बुध्यते ।
अन्यस्त्रीसंगमं सोऽत्रानुकूलो नायको मतः ॥१८॥
विचकिलकुसुमानां सौरभे मग्नभृङ्गः
परकुसुमपरागं याति नैवात्र तद्वत् ।

---

१. तास्त्रीराय°, २. मद्रूलीं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुरतमधुरकेल्यां नायिकायाः प्रसक्तो
न हि परवनितानां संगमं याति रायः ॥१९॥
एकस्यां रागशून्योऽपि सराग इव भासते ।
संलापादिविशेषेण यः सोऽपि शठ उच्यते ॥२०॥

कादम्बनाथ वचनं सुदयासमं ते
ज्योत्स्नासमानमवलोकनचेष्टितं च ।
तन्मल्लिकादिवरदानमिदं च [1]चित्तं
कार्यं न दृष्टमिति वक्ति वधूः शठं त्वाम् ॥२१॥

दृष्ट्वान्यकामिनीसङ्गचिह्नोऽपि वितथं वदेत् ।
वैयात्येन स धृष्टः स्यान्नायकः कथितो बुधैः ॥२२॥

नमनवचनदम्भो मास्तु मास्तु त्वदीयः
कपटमिदमनेकं दृष्टमत्यन्तदृष्टम् ।
तव सकलशरीरेऽन्याङ्गनासंगचिह्नं
सर सर वरकान्ता रायबङ्कं ब्रवीति ॥२३॥

एकाङ्गनालोलचित्तः समभावेन वर्तते ।
अन्याङ्गनासु स प्रोक्तो दक्षिणो नायको बुधैः ॥२४॥

[2]त्रुटितं दुर्बोधं च पद्यस्यास्य चरणद्वयं यथा पादटिप्पण्यां लिखितम्
कर्पूराणि वितीर्य चारुरमणीवृन्दाय दूतीजना
श्रीरायो नृपकुञ्जरः प्रहितवान् साहित्यरत्नाकरः ॥२५॥

इदमपि दक्षिणनायकनिदर्शनम्—
नीरेजं वरमल्लिकां किसलयं चूतस्य नीलोत्पलं
कङ्केलिस्थितपल्लवं निजमहामाहात्म्यसंसूचकम् ।

---

१. चित्रं, २. रौरागापरमादिवर्णविलसन्नामानि ''' समुदर्यकान्ताममहा-
त्कस्तूरिरागाक्षर ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दत्वालीजनपञ्चकस्य हि करे कान्ताजनेभ्यो मुदा
श्रीरायो वरदक्षिणः प्रहितवान् शृङ्गारदुग्धाम्बुधिः ॥२६॥

धीरोदात्तादिनेतॄणां शृङ्गारे षोडशात्मनाम् ।
उत्तमादिविभेदेन प्रत्येकं त्रिविधात्मता ॥२७॥

शृङ्गाराख्यरसे नेतृभेदा लोके निरूपिताः ।
अष्टसंख्योत्तराश्चत्वारिंशत्संख्याः कवीश्वरैः ॥२८॥

एतेषां नायकानां तु सहाया उपनायकाः ।
विदूषकः पीठमर्दो विटो नागरिको मताः ॥२९॥

नायकस्य[1] प्रसंगे च नानाहासकरो मतः ।
विदूषकः सतां [2]लोकव्यवहारादिविच्च यः ॥३०॥

नायकोक्तेषु कार्येषु पटुर्नायकसद्गुणात् ।
किंचिन्न्यूनगुणः प्रोक्तः पीठमर्दो बुधोत्तमैः ॥ ३१ ॥

नायकानां चित्रवृत्तेरानुकूल्यपरो विटः ।
नानाकलाप्रौढियुक्तो मतो नागरिको बुधैः ॥ ३२ ॥

[3]लुब्धाधीरोद्धता ये च स्तब्धाः पापपरायणाः ।
[4]ते पुनर्नायकाभासाः पुरुषाः प्रतिनायकाः ॥ ३३ ॥

पूर्वोक्तानां नायकानां यौवने तु गुणाष्टकम् ।
सत्त्वसंजातमित्युक्तमधुना तन्निरूप्यते ॥ ३४ ॥

तेजो विलासो माधुर्यं शोभा स्थैर्यं गभीरता ।
औदार्यं ललितं चेति गुणाष्टकमिति स्मृतम् ॥ ३५ ॥

प्राणाभावेऽपि पुरुषो धिक्कारादिपराभवम् ।
क्षमते जातु नो यत्तत्तेजः प्रोक्तं विशारदैः ॥ ३६ ॥

---

१. प्रसङ्गे ह, २. व्यवहारादि···विधः, ३. लुब्धादिरोद्धता ऐ च स्तब्धाः, ४. तेषु नर्नायकाभासाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सधैर्यं गमनं दृष्टिः सधैर्या स्मितभाषणम् ।
विलासाख्यगुणं प्रोक्तं गुणोद्भासिकवीश्वरैः ॥ ३७ ॥
महत्यपि च संक्षोभे सूक्ष्मां चर्चां करोति यत् ।
तन्माधुर्यं गुणः पुंसां बुध्यतां बुधसत्तमैः ॥ ३७ ॥
शोभायां दक्षता शौर्यं स्पर्धा नीचैर्गुणाधिकैः ।
उद्योगाच्चलनाभावः स्थिरत्वं विघ्नकोटिभिः ॥ ३९ ॥
यत्प्रभाववशात् पुंसि विकृतिर्न कदाचन ।
तद्गाम्भीर्यं सतामिष्टं जगत्त्रयमनोहरम् ॥ ४० ॥
यत्प्राणानपि तद्वापि प्रियोक्त्या सज्जनानलम् ।
सत्करोति तदौदार्यं लोकोत्तरगुणो मतम् ॥ ४१ ॥
शृङ्गाराकृतिचेष्टा तु सहजा कोमला बुधैः ।
ललिताख्यगुणो लोके कथ्यते गुणशालिभिः ॥ ४२ ॥
लक्षणं नायकानां हि प्रतिपाद्याधुना पुनः ।
नायिकालक्षणं तासां भेदोऽपि च निरूप्यते ॥ ४३ ॥
सामान्यनायकप्रोक्तविनयादिगुणान्विता ।
नारी तु नायिका प्रोक्ता सापि नारी चतुर्विधा ॥ ४४ ॥
स्वकीया परकीयाप्यनूढा साधारणा स्मृता ।
अनूढा परकीयैव इत्येकेषां मते त्रिधा ॥ ४५ ॥
धर्मार्थिकामयुक्तानां स्वकीया नायिका नृणाम् ।
अन्यास्तु नायिका लोके मता केवलकामिनाम् ॥ ४६ ॥
[1]त्रिवर्णनायकेनेयं देवतागुरुसाक्षिका ।
उपात्ता नायिका स्वीया सदाचारक्षमायुता ॥ ४७ ॥
[2]शीलार्जवधैर्यशौर्यलज्जायुक्ता पतिव्रता ।
त्रिवर्गसाधिका लोके स्वकीया ललनोत्तमा ॥ ४८ ॥

---

१. त्रिवर्ति° । २. शीलार्जवातितरां शौर्यं° ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादम्बेश्वररायश्चित्तो(?)रूपद्माकरे
हंसी वीरनृसिंहरायकृतसद्धर्माम्बुधेः कौमुदी।
राज्ञी पट्टकृताभिषेकमहिता कन्दर्पकान्तोपमा
कान्ता शीलवती सती [1]मधुरवाक् श्यामासमा राजते ॥४९॥
अनुरागवता केनचित् पुंसा स्वीकृता तु या।
स्वयमप्यनुरक्ता च सानूढा नायिका मता ॥ ५० ॥
यथा दुष्यन्तनृपतेर्नायिका तु शकुन्तला।
तथा लोकानुसारेण सानूढा परिकीर्तिता ॥ ५१ ॥
परकीयाप्यनूढेव ज्ञातव्या विद्यते तयोः।
ईषद्भेदः स्वयं रक्तानूढा नायकमिच्छति ॥ ५२ ॥
परकीया [2]सखीवाचा याति नायकसंनिधिम्।
इति केचिद्वदन्त्येके न हि भेदस्तयोरिति ॥ ५३ ॥

तद्यथा—

परेण परिणीता च परकीया मता पुनः।
अनूढा कन्यका चापि परकीया प्रकीर्तिता ॥ ५४ ॥
परेण परिणीता तु नास्ति मुख्यरसे क्वचित्।
अनूढा कन्यका प्रोक्ता गौणमुख्यरसे यथा ॥ ५५ ॥

परपरिणीता नायिका मुख्यरसे उदाहर्तुमयोग्या। अनूढा कन्यका तु गौणमुख्ये च रसे उदाहर्तुं योग्येत्यर्थः।

मनसिजनृपरूपं रायबङ्गं सुधाब्धि
तदमलगुणराश्याकर्णनाद् राजकन्याः।
मदनकदनबाणैः पीडिताः कामयन्ते
नुलरतिसमरूपा दिव्यलावण्यभाजः ॥ ५६ ॥

---

१. काय''' समा राजते। २. संनिवाचा।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलाप्रौढियुता धैर्यराजिता दम्भपण्डिता ।
वेश्या साधारणा प्रोक्ता नायिका विदुषां वरैः ॥ ५७ ॥
दातैव नायकस्तस्या न हि कश्चित् परो भुवि ।
रक्तेव सदने पुंसि निर्धनं वर्जयेन्नरम् ॥ ५८ ॥
कादम्बनाथनृप चारुमहासमृद्ध-[1]
वेश्याजना रतिसमानमनोज्ञरूपाः ।
कामैन्द्रजालिककृताद्भुतमोहविद्या-
कल्पा विभान्ति कुसुमास्त्र[2]शरौघदेश्याः ॥ ५९ ॥
स्वकीया नायिका मुग्धा मध्या लोके तथा मता ।
प्रगल्भेति त्रिधा सद्भिस्तासां लक्षणमुच्यते ॥ ६० ॥
नवीनयौवना नारी नवमन्मथविक्रिया ।
वक्रा सुरतलीलायां मुग्धा किंचिद् रुषा युता ॥ ६१ ॥
आस्यं नापि ददाति चुम्बनविधौ स्वाङ्गं निजालिङ्गने
नो धत्ते नवमन्मथग्रहयुता लज्जाभरात् कुप्यति ।
क्षेत्रारम्भसमानयौवनयुता कन्या नवोढा सती
रायक्ष्मापतिनायकस्य जनयत्युल्लासनं चेतसि ॥ ६२ ॥
उत्पन्नयौवनोद्भूतकामा मध्या च नायिका ।
रतिक्रियापरवशा न जानाति किमप्यसौ ॥ ६३ ॥
चुम्बन्तं परिरम्भणं दृढतरं कुर्वन्तमङ्गोद्भवं
श्रीरायं निजनायकं परमसंतोषं नयन्ती सती ।
शृङ्गाराम्बुधिकौमुदी रतिसुखाम्भोधौ निमग्ना परं
नो जानाति सुखातिरेकवशगा केलिं[3] परां कामपि ॥६४॥
अत्यन्तयौवनात्यन्तकामा नायकवक्षसि ।
लीनेव सुरतारम्भे प्रगल्भा पारतन्त्र्यभाक् ॥ ६५ ॥

१. °महासवेश्याजनारति । २. शवाघ । ३. केलिं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लिष्यन्तं स्मररायनायकवरं स्पृष्ट्वा प्रगल्भा सती
मोहोद्रेकवशात् परं परवशा केलीविधौ राजते ।
लक्ष्मीर्वक्षसि वा स्मरेशलिखितं तज्जीव(? सज्जीव)चित्रं रतेः
शृङ्गाराम्बुधिजातनिश्चलतरा श्रीकल्पवल्लीव सा ॥६६॥
धीरात्वधीरा लोके हि धीराधीरेति सा मता ।
त्रिविधा नायिका मध्या गुणशालिकवीश्वरैः ॥ ६७ ॥
उपहास[1]युता या च वक्रवाचा स्वनायकम् ।
खेदयेत्सापराधं सा मध्या धीरा प्ररूप्यते ॥ ६८ ॥
श्रीराय ते नभसि वक्षसि कौमुदीयं
भाले वरे मकरिका वरवज्रमस्ति ।
तत्पुण्यमत्र महदस्ति तथा फलं च
तत्रैव तिष्ठ न तु मां स्पृश याहि याहि ॥ ६९ ॥
सापराधं निजेशं या वचसा कर्कशेन हि ।
रुदती भेदयेत् सा त्वधीरा मध्या मता यथा ॥ ७० ॥
श्रीरायं निजगेहमागतमिमं दृष्ट्वा सतीत्यब्रवी-
न्नाथात्रागमनं नवीनमिदमाश्चर्यं च पुण्यं मम ।
···मौक्तिकं विचकिलस्रग्गन्धवज्रं त्वया
धन्याहं सुकृती त्वमेव भुवने नेत्राश्रुवारान्विता ॥ ७१ ॥
प्रगल्भा नायिका त्रेधा धीराधीरे पुनस्तथा ।
धीराधीरेति कथिता नेतृनिश्चयकोविदैः ॥ ७२ ॥
कृतापराधं सुरते नायकं दुःखयेद् रुषा ।
या च या वादरेणास्ते सावहित्था सकोपना ॥ ७३ ॥
तादृशं प्रति भर्तारं सावशा वा प्ररूप्यते ।
प्रगल्भधीरा भुवने कामसिद्धान्तवेदिभिः ॥ ७४ ॥

---

१. °युजा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोपालिङ्गितलोलकेन वचसा मर्मस्पृशा मालती-
मालाघातनलीलया निजपतिं भीतिं नयन्ती सती ।
श्रीरायं निजकामिनी तममलं हारं गृहे नागसे (? गृहेऽनागतं)
कोपं भावजपूज्यराज्यसदनं(?) चित्तेऽकरोत्कोविदा ॥ ७५ ॥
श्रीराये गृहमागते हरिलसत्पीठं प्रदाय स्वयं
ताम्बूलं हरिचन्दनं विचकिलं कर्पूरसारोच्चयम् ।
सा कान्ता चतुरङ्गचारुकलया केलीविधिं कुर्वती
नानालीजनसंनिधौ गतरतिः कोपं कृतार्थं व्यधात् ॥ ७६ ॥
निजेशं तर्जनं कृत्वा संताडयति या वधूः ।
अधीरा सा प्रगल्भा च नायिका परिकीर्तिता ॥ ७७ ॥
कोपान्नायिकया निजेशनृपतिः श्रीरायबङ्गो गृही
मालत्या कृतमालया श्रुतिगतैः श्रीकर्णपूरैरपि ।
वामेनाङ्घ्रितलेन रोधनयुजा संताड्यमानो हसन्
शान्तस्तोषपरः कृती सुकृतिनामग्रेसरो जायते ॥ ७८ ॥
वक्रवाचं सोपहासां या ब्रूते रमणी क्रुधा ।
धीराधीरा प्रगल्भा सा नायिका कथिता बुधैः ॥ ७९॥
श्रीराय भो नगसि पश्यसि दैन्यवाचं
ब्रूषे मनोज्ञतरवस्तुततीमुदासी ( ? ) ।
सत्यं तथैव भुवने न च कोऽपि दोषो
दृष्टस्तथापि [1]यमपाटिजनस्य कोपः (?) ॥ ८० ॥
त्रिभेदसंयुता मध्या प्रत्येकं द्विविधा पुनः ।
ज्येष्ठा चेति कनिष्ठा च षड्विधाभूत् सतां मते ॥ ८१ ॥
एवं प्रगल्भा कथिता षड्विधा कविपुङ्गवैः ।
ज्येष्ठाकनिष्ठयोरत्र दृष्टान्तः प्रतिपाद्यते ॥ ८२ ॥

---

१. मम पाटि॰ ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कासारं जललीलया परिगते दृष्टो रमण्या नृपः
श्रीरायो जलसेचनं परिलसद्यन्त्रेण कृत्वा सतीम् ।
मज्जन्तीं सरसीजले भयवशात्कृत्वा परां कामिनीं
चुम्बित्वाधरपान[1]संज्ञजलधौ तन्तन्यते मज्जनम् ।। ८३ ।।

चुम्ब्यमाना नारी ज्येष्ठा । इतरा कनिष्ठा ।

नायिकालक्षणं तासां भेदं चोक्त्वाधुना पुनः ।
तासामष्टाववस्थास्ताः प्ररूप्यन्ते भृशं मया ।। ८४ ।।
स्वाधीनपतिका नारी काचिद्वासकसज्जिका ।
कलहान्तरिता काचिद्विप्रलब्धा परा मता ।। ८५ ।।
विरहोत्कण्ठिता काचित् काचित् प्रोषितभर्तृका ।
खण्डिता रमणी काचित् काचिदन्त्याभिसारिका ।। ८६ ।।
यस्याः सामीप्यमाश्रित्य यदधीनः पतिः सदा ।
स्वाधीनपतिका नारी सा प्रोक्ता रसकोविदैः ।। ८७ ।।
काञ्चीनारीं नृपतितिलको रायबङ्गः सदालं
स्वारुह्याङ्कं पिबति मधुरं चाधरं प्रेक्षतेऽङ्गम् ।
तत्संलापं निशमयति वै सौरभं जिघ्रतीदं
स्पृष्ट्वा स्पृष्ट्वा वरकुचयुगं मोदते कामतन्त्रः ।। ८८ ।।
प्रियस्यागमनं श्रुत्वा मुदा भूषणभूषिता ।
या नारी सा स्तुता लोके सतां वासकसज्जिका ।। ८९ ।।
श्रीरायागमनोत्सुका रतिसमा नारी मनोहारिणी
सालंकाररसोरुवृत्तिगुणसद्रीतिप्रभावान्विता ।
नानावर्णनया कवीन्द्रकृतया युक्ता [2]सशय्या सदा
सार्था सूक्तिविलासिनी गतमला चारु प्रबन्धायते ।।९०।।
आगतं नायकं कोपात्तिरस्कृत्य तदर्थिनी ।
या दुःखपीडिता सात्र कलहान्तरिता यथा ।। ९१ ।।

१. 'सङ्घ्य' । २. सशय्यास्सदा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भो भो निष्ठुरभाषिणि प्रियतमे श्रीरायबङ्गः पति–
निर्धूतो रतिनाथव्याहतकरोऽप्यज्ञानदोषात्त्वया ।
दुःखं त्वं विदधासि चेत् पुनरसौ नायाति पुण्याम्बुधिः
शेषस्त्रीसरसीजचारुनिकरे श्रीराजहंसायते ॥ ९२ ॥

नागते नायके गेहं संकेतविषयं यदा ।
तदावमानिता नारी विप्रलब्धा मता यथा ॥ ९३ ॥

सरसमधुरवाणीभाषिता नायकेन
तदमलवचनेऽहं प्रत्ययं साधु कुर्वे ।
उरुतरसमयालीप्रापिता तेन दूति
नहि नहि मम नाथः प्रत्ययो नापि कुत्र ॥ ९४ ॥

असत्यरहिते नाथे विलम्बनयुते सति ।
उत्कण्ठां कुरुते या सा विरहोत्कण्ठिता मता ॥ ९५ ॥

श्रीराये निजनायके रतिपतौ कालं चिरं नागते
नारी चन्द्रमसं न पश्यति मनोजातेष्टचापेहया ।
नारीवृन्दवचः शृणोति न कलकण्ठानां स्वराणां धिया
द्रष्टुं नेच्छति कौमुदीं विचकिला (? विचकिता) सारोरुबाण-
भ्रमात् ॥ ९६ ॥

देशान्तरं गते नाथे या नारी मानसीं व्यथाम् ।
करोति सा मता लोके बुधैः प्रोषितभर्तृका ॥ ९७ ॥

राये दिग्विजयाय सैन्यकलिते याते स्वकीया सती
स्नानं मुञ्चति भूषणं च मलिनं गृह्णाति चीनाम्बरम् ।
मालां चन्दनलेपनं परिलसत्कस्तूरिकाचित्रकं
त्यक्त्वा गायति वीणया निजपतेः सौभाग्यमालां पराम् ॥९८॥

ज्ञातमन्मथचिह्ने या नारीर्ष्यां विदधाति सा ।
खण्डिता रमणी प्रोक्ता नायके रसिकोत्तमे ॥ ९९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनसिज तव कार्यं मन्मथो वेत्ति सर्व-
महमपि तव काये गोपिते वेद्मि किंचित् ।
[1]अनिकटनिवासी वामपादोऽर्पितोऽस्या
विलसदरुणवर्णो दृश्यते राय साक्षात् ॥ १०० ॥
नाथं सरति या नारी दूतीं वा सारयत्यसौ ।
प्रोक्ताभिसारिका लोके नायिकाभेदवेदिभिः ॥ १०१ ॥
वञ्चित्वात्मीयलोकं या पतिं गच्छति सागसम् ।
सा रायबङ्गभूमीशशासनाद्धीतिमृच्छति ॥ १०२ ॥
रसप्रकरणे प्रोक्तश्चतुर्धा विप्रलम्भकः ।
पूर्वानुरागो मानश्च प्रवासः करुणात्मकः ॥ १०३ ॥
वियुक्तनायकस्यासौ वियुक्तायाः स्त्रियोऽपि च ।
शृङ्गारो विप्रलम्भाख्यो वक्तव्यो वदतां वरैः ॥ १०४ ॥
नवीनालोकनाज्ञातरागयोरवितृप्तयोः ।
पूर्वानुरागो दम्पत्योरवस्था परिकीर्त्यते ॥ १०५ ॥
अन्यस्त्रीसंगमादीर्ष्या विकारो मान उच्यते ।
परदेशं गते नाथे प्रवासो विरहात्मकः ॥ १०६ ॥
अनुरक्तस्य नाथस्य नायिकायाश्च तादृशः ।
एकस्य मरणे जातः शृङ्गारः करुणात्मकः ॥ १०७ ॥
खण्डितायां नायिकायां शृङ्गारो मान उच्यते ।
प्रोषितप्रियनारीषु प्रवासः परिकीर्तितः ॥ १०८ ॥
कलहान्तरिता या वा विप्रलब्धा च या सती ।
विरहोत्कण्ठिता या च तासु पूर्वानुरागकः ॥ १०९ ॥
परलोकं गते नाथे कामिन्यां वा प्ररूप्यताम् ।
अवशिष्टजने सद्भिः शृङ्गारः करुणात्मकः ॥ ११० ॥

---

१. अनिकतउनिवासो वामपादार्पितोऽस्या ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आसां स्त्रीणां सखी दासी लिङ्गिनी प्रतिवेशिनी ।
धात्रेयी शिल्पिका कारूर्दूत्यः प्रोक्ताः स्वयं तथा ॥ १११ ॥
भो भो राय मनोजपातकमहो क्रूरेण संपीड्यते
नारी मुञ्चति वाग्विलाससरणीं धत्ते तनुत्वं तनोः ।
आहारोऽपि न रोचते भ्रमवशा त्वद्भावचित्रं दृशा
दृष्ट्वाऽलिङ्गति चुम्बति[1]त्वरितमागत्येह तां रक्षतात्॥११२॥
पूर्वोक्तनायिकानां तु यौवने सत्त्वसंभवाः ।
अलङ्काराः प्ररूप्यन्ते विंशतिः कविकुञ्जरैः ॥ ११३ ॥
भावहावौ तथा हेला शोभा कान्तिश्च दीप्तिका ।
मधुरत्वं तथा चोक्तं प्रागल्भ्यं च वदान्यता ॥ ११४ ॥
धैर्यं लीला विलासश्च विच्छित्तिर्विभ्रमस्तथा ।
किलकिञ्चितमप्युक्तं तथा मोट्टायितं तथा ॥ ११५ ॥
अथ कुट्टमितं चोक्तं बिब्बोको ललितं ततः ।
विहृतं परिकीर्त्यन्ते लक्षणानि पृथक् पृथक् ॥ ११६ ॥
एषामाद्यास्त्रयो देहसंभवाः कथितास्ततः ।
सप्तालङ्कृतयो गीतास्ततः स्वाभाविका दश ॥ ११७ ॥
चित्तवृत्तिविशेषोऽयं कन्दर्पविकृतिच्युतः ।
सत्त्वं तस्याद्यविकृतिर्भावो मन्मथयोगिनी ॥ ११८ ॥
भाविहावाद्यलङ्कारसाधनीभूत उच्यते ।
भावोऽयं सर्वश्रृङ्गाररसहेतुश्च कोविदैः ॥ ११९ ॥
जात्यश्वारूढरायं पुरसरणिगतं राजकन्या विलोक्य
भ्रूविक्षेपाक्षिलौल्यं कुसुमशरशराघातसंपीड्यमानाः ।
मन्दं मन्दं स्वचेतो विशदपि नवपुष्पायुधाश्चारुरूपा
रंरम्यन्ते मनोज्ञप्रकटितनिजलावण्यभाजो गृहाग्रे ॥ १२० ॥

१. त्वरितागत्य प्राण रक्षतात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चित्तशृङ्गारभूतोऽयं भ्रूलोचनविकारकृत् ।
भाव एव बुधैर्लोके हावालङ्कार उच्यते ॥ १२१ ॥
आस्येन्दुनिर्गतमनोहरचन्द्रिकाभैः
पुष्पेषुबाणसदृशैस्तरलैः कटाक्षैः ।
शृङ्गारभावगमकैर्नृपरायबङ्ग
नारी भवन्तमवलोक्य सुखाब्धिगाभूत् ॥ १२२ ॥
शृङ्गारगमको हावो यः सुस्पष्टः प्रवर्तते ।
स एव हेला विबुधैः कथ्यते गुणराजितैः ॥ १२३ ॥
चकोरीसदृशीदृष्टिकटाक्षायतजिह्वया ।
रमण्या तव रायेश रूपं पेपीयतेऽमृतम् ॥ १२४ ॥
रूपोपभोगतारुण्यैः शरीरालंकृतिः कृता ।
या सैव शोभा गदिता महाकविमतानुगैः ॥ १२५ ॥
तरुण्या रूपसौन्दर्यं स्मरचेतोहरं वरम् ।
दृष्ट्वा चित्रीयते रायो भूषणापेक्षया विना ॥ १२६ ॥
मनोरागेण निबिडा सैव शोभा निगद्यते ।
कान्तिः स्त्रीणां मनोजाज्ञाशालिनीनां बुधोत्तमैः ॥ १२७ ॥
आरामकुञ्जगतमुग्धसती बिभेति
ध्वान्ते गते निजकटाक्षमयूखजालैः ।
पादाब्जचारुनखदीधितिभिश्च राय-
बङ्गान्विता सुरतकेलिविदः सकाशात् ॥ १२८ ॥
विस्तारं याति या कान्तिः सैव दीप्तिर्मता सताम् ।
पुष्पायुधमहासेनादेश्यस्त्रीषु प्रवर्तते ॥ १२९ ॥
श्रीरायबङ्गसहिता गुरुतुङ्गसौध-
मारुह्य मारतरुणीनिभकोमलाङ्गी ।
सिंहासने स्थितवती निजदेहदीप्त्या-
काशं प्रकाशयति चारुतडिल्लतेव ॥ १३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवर्णनोयवस्तूनां संबन्धेऽपि प्रवर्तते ।
यद्द्रव्यत्वं तदेवात्र माधुर्यं प्रतिपादितम् ॥ १३१ ॥

नृपतितिलकराये कोपिते कोमलाङ्गी
मलिनवसनयुक्ता रम्यतां नो जहाति ।
घनकृतवरणेयं कौमुदी सत्कला वा
शितितनुमदनो वा रम्यतां नो जहाति ॥ १३२ ॥

मनोवचनकायेभ्यः समुत्पन्नभयस्य या ।
प्रगल्भता निवृत्तिः सा ज्ञातव्या बुधकुञ्जरैः ॥१३३॥

मनोवचनकायजनितभीतिरहितं कलाशास्त्रप्रयोगचातुर्यं प्रागल्भ्यमिति भावः ।

यद्गानं परमामृतं श्रुतिहरं श्रुत्वा मुदा कोकिलो
[1]रौति प्राप्तसुखं शुकोऽपि वचनं श्रुत्वा यदीयं प्रियम् ।
ब्रूते सूक्तिमिमां यदीयनटनं दृष्ट्वा शिखी नृत्यति
स्वात्मानन्दसमन्विता जयति सा श्रीरायकान्ता सती
॥ १३४ ॥

आयासे सति कामिन्या बह्वावपि गुणोत्तमः ।
विनयोत्कर्ष औदार्यमुच्यते कविनायकैः ॥१३५॥

नवकेलिविनोदेन श्रान्ता पानीयलीलया ।
तन्वी विमुक्तनिद्रापि रायशय्यां न मुञ्चति ॥१३६॥

चापल्यरहिता चित्तवृत्तिः स्थिरतराथवा ।
तरुणीजनसंबद्धा या सा धैर्यं निरूप्यते ॥१३७॥

रायनाथस्य रागे या यादृशी रमणी तु सा ।
कोपेऽपि तादृशी जाता महादेवीपदे स्थिता ॥१३८॥

---

१. लौति श्रातसुखं सुखोपि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रियाविशेषैरधिकैर्मनोहरतरैरपि ।
नायकाभिनयो लीला नायिकाविहितो यथा ॥१३९॥
हसति वसति चास्ते लोकते याति दत्ते
गदति नदति शेते याचते राजतेऽलम् ।
लिखति पिबति भुङ्क्ते रोदिति[1] मोदते च
नृपतितिलकरायो यादृशस्तादृशी सा ॥१४०॥
दृष्टे निजेशे कामिन्या देहसंजनितो भृशम् ।
क्रियाद्यतिशयः प्रोक्तो विलासो रसिकैर्यथा ॥१४१॥
रायेशं स्मरसंनिभं स्मरसखं क्षीराब्धिचन्द्रं मुदा
दृष्ट्वा स्विद्यति कम्पते सृतिकरं धैर्यं च मुञ्चत्यहो ।
उत्कण्ठां [2]मनुते न नौति सरसालोकं शरच्चन्द्रिका–
संकाशं रमणीमनोजनशठो कन्दर्पसिद्धान्तवित् ॥१४२॥
तरुणीकायदेशे स्वीकृता स्वल्पाप्यलंक्रिया ।
करोति जनतानन्दं या सा विच्छित्तिरुच्यते ॥१४३॥
किसलययुतकर्णा मल्लिकाकुड्मलौघैः
कृतरुचिकरहारा मालतीसृग्विभूषा ।
मलिनवसनयुक्ता माधवी कन्दुकेन
विहरति रमणी या साकरोद्रायसौख्यम् ॥१४४॥
आयातं नायकं श्रुत्वा संभ्रमेण मुदा सती ।
अस्थाने भूषणं धत्ते यत्तद्विभ्रम उच्यते ॥१४५॥
आगच्छन्तं निजेशं रतिपतिसदृशं रायबङ्गं निशम्य
प्रोद्भिन्नानन्दमूर्तिः परवशगमनादञ्जनैर्लिप्तकण्ठा ।
पीनोत्तुङ्गस्तनाग्रे मृगमदतिलकालंकृता भालभागे
हारालंकारयुक्ता रतिसमरमणी चारुता[3] मूर्तिरास्ते ॥१४६॥

---

१. रोदते, २. मरुतेन नोति, ३. नूर्तिचित्ते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृताश्रूणां शङ्कादीनां सांकर्यं रमणीजने ।
किलकिञ्चितमित्युक्तं शृङ्गाररसकोविदैः ॥१४७॥
कादम्बनाथमदनेन सुधाधरेऽलं
संपीडिते मधुरचुम्बनपानपूर्वम् ।
तन्वी तनोति मुदमश्रु च तर्जनं च
सीत्कारताडनविनोदपदप्रहारात् ॥१४८॥
नाथस्य चित्रे वस्त्रे च प्रतिमाभरणादिषु ।
नाथभावेन या बुद्धिः सा मोट्टायितमुच्यते ॥१४९॥
स्मृत्वा निजेशं स्वाङ्गस्य भङ्गो जृम्भणपूर्वकः ।
पृष्ठादिनमनादिर्वा मोट्टायितमुद्गीरितम् ॥१५०॥
रायरूपपटीं दृष्ट्वा तन्वी मोहेन चुम्बति ।
आलिङ्गति च रायेन्द्र इति मत्वा प्रमोदिनी ॥१५१॥
आलीजनेन नृपकुञ्जररायबङ्गे
संवर्णिके मनसि तत्स्मरणं विधाय ।
गात्रं विवर्तयति बाहुयुगं च तन्वी
[1]वक्रं करोति मदनग्रहपीडिता सा ॥१५२॥
आलिङ्गने चुम्बनादौ कृते वा जीवितेशिना ।
अन्तरङ्गे सुखं बाह्ये रोषः कुट्टमितं यथा ॥१५३॥
आलिङ्ग्य चुम्बति नृपे सति रायबङ्गे
नारी मनोजसुखवार्धिगतापि चित्ते ।
हस्तेन कम्पनयुतेन निवारयन्ती
रोषं करोति पुलकालिविराजमाना ॥१५४॥
गर्वगौरवमालम्ब्य तरुण्यानादरः कृतः ।
जीवितेशे स बिब्बोकः कथ्यते रसिकैर्जनैः ॥१५५॥

---

१. चक्रं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगत्य रायनृपतौ निजपादयुग्मे
नत्वापराध्रमखिलं रमणि क्षमस्व ।
इत्युक्तिमात्तविनयां वदति प्रवीणां
मर्मज्ञया वनितया न कृतः कटाक्षः ॥१५६॥
शरीरावयवन्यासः स्निग्धकोमलतायुतः ।
तरुणीजनसंबन्धी ललितं प्रतिपाद्यते ॥१५७॥
भ्रूविक्षेपं किसलयमृदुं वाग्विलासं सुमाभं
नेत्रालोकं कुवलयनिभं पादपङ्केजयानम् ।
चन्द्रौपम्यं मधुरहसनं कौमुदीसाम्ययुक्तं
कृत्वा कान्ता जनयति मुदं रायभूमीश्वरस्य ॥१५८॥
वक्तुं योग्यमपि स्वान्तस्स्थितं नारी निजेशिना ।
न ब्रूते लज्जया यत्तद्विहृतं परिभाषितम् ॥१५९॥
उद्याने प्रीतियुक्ता विमलसलिलसत्क्रीडनेच्छापि कान्ता
प्रासादारोहरक्ता मधुरतरलसत्कन्दुकक्रीडनेच्छा ।
दोलालीलामनीषा सुकविकृतमहाकाव्यगोष्ठीप्रसक्ता
न ब्रूते व्रीडया या मुदमनयदिमां तन्मनोज्ञो निजेशः ॥१६०॥
विनयादिगुणाः प्रोक्ता नेतृसाधारणा हराः ।
[1]गुणाष्टकं च दृष्टान्तास्तेषामूह्या विवेकिभिः ॥१६१॥
यथोचितं नायकोक्तभावहावादयो गुणाः ।
तेषामुदाहृतिर्ज्ञेया नायकेऽपि विशारदे ॥१६२॥
भो भो वीरनृसिंहराय नृपते लोकत्रये सन्ति ये
नेतारो बहवश्च तेऽपि सुलभा[2]श्चेतोहरा नो सताम् ।
नानावाग्मिकवीश्वरस्तुतिपदानेकोरुकीर्तिप्रथः
धीरोदात्ततया प्रसिद्धपुरुषो लोके भवानेव वै ॥१६३॥

इति नायकभेदनिश्चयो नाम चतुर्थः परिच्छेदः ।

---

१. गाणाष्टकं, २. श्चेतोहरौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# दशगुणनिश्चयो नाम

## पञ्चमः परिच्छेदः

गुणरीतिवृत्तिशय्यापाकानां लक्षणं मया ।
तल्लक्षणार्थिनां नृणां बोधाय प्रतिपाद्यते ॥ १ ॥
निर्गुणा रमणी लोके यथा सद्भिर्न पूज्यते ।
निर्गुणः काव्यबन्धोऽपि तथा नार्च्यः कवीश्वरैः ॥ २ ॥
अतो गुणाः प्रकीर्त्यन्ते पूर्वशास्त्रानुसारतः ।
कामिराय नराधीश श्रूयतां भवताधुना ॥ ३ ॥
सुकुमारत्वमौदार्यं श्लेषः कान्तिः प्रसन्नता ।
समाधिरोजो माधुर्यमर्थव्यक्तिस्तु साम्यकम् ॥ ४ ॥
एते दशगुणाः प्रोक्ता दश प्राणाश्च भाषिताः ।
यथासंख्यं मया तेषां लक्षणं प्रतिपाद्यते ॥ ५ ॥
श्रुतिचेतोद्वयानन्दकारिणां कोमलात्मनाम् ।
वर्णानां रचनान्यासः सौकुमार्यं निरूप्यते ॥६॥
श्रीरायवङ्गक्षितिनायकस्य कीर्तिर्विशाला वरचन्द्रिकैव ।
न चेत् त्रिलोकीजनचित्त[1]जातं संतापजालं क्व निराकरोति ॥ ७ ॥
अर्थचारुत्वगमकं पदान्तरविराजितम् ।
पदानां यदुपादानं तदौदार्यं मतं यथा ॥ ८ ॥
शब्दानामभिधेयानां [2]गुणोत्कर्षा यदाथवा ।
तदौदार्यं मतं लोके तदुदाहरणं यथा ॥ ९ ॥
कादम्बनाथस्य मदान्धशूरक्षोणीधरोत्तुङ्गमहागजेन्द्रः ।
[3]दिग्दन्तिनैरावतनामकेन स्पर्धां विधत्ते जगदद्भुतोऽसौ ॥१०॥

१. °जाता, २. गुणोत्कर्षाय योऽथवा, ३. दिगंतिनैरावत°।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परस्परं प्रयुक्तानि स्यूतानीव पदानि वै ।
निबिडानि प्रवर्तन्ते यत्र स श्लेष उच्यते ॥ ११ ॥

यस्योत्तुङ्गविशालकीर्तिविसरं दृष्ट्वा जगन्मोदते
क्षीराब्धिर्दिगिभो महाधवलिमा व्योमापगाबन्धुरा ।
नानाकारविचित्रशारदमहामेघावलीप्रोल्लस-
त्कैलासाचलभूतिसारमिति तां मत्वा जगज्जृम्भितम् ॥१२॥

अल्पप्राणाक्षराण्येव निबिडानि पदानि वै ।
यत्र स श्लेष इति वा केचिल्लक्षणमूचिरे ॥१३॥

तदुदाहरणमिदम्—

उल्लसन्ती त्वदीयेयं कीर्तिश्रीर्मूर्तिराजिनी ।
जगद्वर्तिकवीन्द्राणां सूक्तिजाले प्रकाशते ॥१४॥

प्रयुक्तो लौकिकार्थोऽपि यथा भवति सुन्दरः ।
सा कान्तिरुदिता सद्भिः कलागमविशारदैः ॥१५॥

अथवा पदबन्धस्योज्ज्वलत्वं कान्तिरुच्यते ।
उदाहरणमेतस्या गीयते शृणु भूपते ॥१६

उपवनजलकेलीसक्तकान्ताजनानां
करकृतजलसेकः सौधधारानिषेकः ।
विगलितकचबन्धान्मालतीमालिकाया
विगलनमतितोषं रायबङ्गे व्यदत्त ॥१७॥

प्रयुक्तस्य पदस्यार्थो यतः शीघ्रं प्रतीयते ।
पदेन वा प्रसन्नोऽर्थो यत्र सा वा प्रसन्नता ॥१८॥

भो रायबङ्ग कीर्तिस्ते शरदभ्रविलासिनी ।
व्योमगङ्गाप्रवाहाभा बम्भ्रमीति जगत्त्रये ॥१९॥

---

१. °भूरिसारमिति का मत्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यवस्तुगुणारोपोऽन्यत्र योऽयं प्रकीर्तितः ।
स समाधिरिति ज्ञेयः कवितागुणकोविदैः ॥२०॥
आरोपादन्यधर्मस्य[1] प्रकृतार्थस्य गौरवम् ।
समाधिरुच्यते सद्भिरिति वा लक्षणं मतम् ॥२१॥
श्रीरायस्य यशोऽमितं कुसुमितं त्यागाम्भसा तेजसा–
नल्पं तत्फलितं विवेकगुणतो ध्वस्तश्च कल्पद्रुमः ।
खड्गोऽयं नरकाल[2]राहुरमलस्तद्विक्रमस्तुङ्गतः
सूक्तिः सारसुधा प्रतापतपनो लोकत्रये द्योतते ॥२२॥
पद्ये समासबाहुल्यं गद्ये वा हृद्यमुच्यते ।
ओजो गुणः कलाशास्त्रविशारदकवीश्वरैः ॥२३॥
रङ्गत्तुङ्गतरङ्गसंगविलसद्गम्भीर[3]शङ्खध्वनद–
म्भोराशिसमानभीकरमहासेनासमूहाद्भुतः ।
बन्दिव्रातविनूयमानगुणसन्दोहप्रभावोज्ज्वलः
संग्रामाङ्गणराजमानतुरगो जेजीयते राजराट् ॥२४॥
सरसो यत्र शब्दश्च सरसोऽर्थोऽपि जायते ।
तन्माधुर्यमिति प्रोक्तं कर्णानन्दविधायकम् ॥२५॥
सरसवचनलोला चारुलीला कटाक्षा
मधुरहसनचञ्चद्वक्त्रनीरेजशोभा ।
मदगजगतिराजपादपङ्केजयुग्मा
रतिसमवरकान्ता रायतोषं तनोति ॥ २६ ॥
अर्थानेयत्वमित्युक्ते सुखगम्यत्वमुच्यते ।
कष्टकल्पनया शून्यमर्थव्यक्तिस्तदेव हि ॥२७॥
श्रीरायकीर्तिजालेन व्याप्तं जगदिदं सदा ।
शरच्चन्द्रिकया व्याप्तमिवाभाति मनोहरम् ॥२८॥

---

१. °धर्मप्रकृतार्थस्य, २. वर°, ३. शुंभद्गनिद्दांम्भो° ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृदुस्फुटोभयाकारवर्णविन्यासशालिनः ।
बन्धस्य साम्यं समता कथ्यते कविकुञ्जरैः ॥२९॥
श्रीरायबङ्गकान्ताया वदनं चन्दिरायते ।
हासो ज्योत्स्नायते नेत्रयुग्मं नीलोत्पलायते ॥३०॥
एतैर्गुणैर्भासुरकाव्यबन्धं महाकवीनां मृदु वाग्विलासम् ।
श्रुत्वा गुणौघं परिभाव्य चित्ते श्रीरायबङ्गेन्द्र मुदं प्रयाहि ॥३१॥

इति दशगुणनिश्चयो नाम पञ्चमः परिच्छेदः ।

■

१. मृदुस्फुटाभयाकार ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# रीतिनिश्चयो नाम

## षष्ठः परिच्छेदः

रीतिशून्या यथा कन्या न मान्या धरणीतले ।
तथा काव्यं रीतिशून्यं न मान्यं रसिकैर्जनैः ॥१॥
रीतीनां लक्षणं तस्माद् वर्ण्यते भेदसंगतम् ।
शृणु रायनराधीश काव्यसारविशारद ॥२॥
माधुर्यादिगुणोपेतपदानां घटनात्मिका ।
रीतिरित्युच्यते सा च चतुर्भेदा सतां मता ॥३॥
वैदर्भी-गौडिका-लाटी-पाञ्चालीति चतुर्विधा ।
इयं रीतिश्च काव्यस्य स्वरूपमिति बुध्यताम् ॥४॥
शब्दाश्रितप्रसादादिगुणवैशिष्ट्यसंभवात् ।
रीतेः काव्यस्वरूपत्वं निश्चितं कविपुङ्गवैः ॥५॥
प्रसादादिगुणोपेता समासरहिताथवा ।
समस्तद्वित्रपदका स्वल्पघोषाक्षरावली ॥६॥
वर्गद्वितीयबहुला वैदर्भी रीतिरिष्यते ।
उदाहरणमेतस्याः कथ्यते शृणु धीधन ॥७॥
छत्रं सितं दण्डयुतं धृतं ते सन्नीलरत्नं क्षपराय भाति ।
सचञ्चरीकं खरदण्डमब्जं सितं यथा राज्यपदस्य चिह्नम् ॥८॥
ओजःकान्तिगुणोपेता महाप्राणाक्षरान्विता ।
अत्यद्भुत (?अत्युद्भट)समासा च गौडी रीतिरितीष्यते ॥९॥
कल्पान्तानिलवेगघूर्णितचलत्तुङ्गोरुभृङ्गावली–
राजद्वीकरशीकरान्वितमहाडिण्डीरपिण्डाकरः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमद्भूरिमहासमुद्रसमसेनानीकसंभूतधू-
लिजालस्थगितांशुमालिकिरणो जेजीयते रायराट् ॥१०॥

सुकुमारत्वमाधुर्यकान्त्योजोगुणसंयुता ।
पञ्चषट्पदसंक्षिप्ता पाञ्चाली रीतिरुच्यते ॥११॥

नानारत्नविराजमानमुकुटो हारावलीभूषितो
राजद्राजकदम्बपूजितपदो गाम्भीर्यवीर्यान्वितः ।
त्यागोपात्तविशालकीर्तिविसरः सिंहासनाधीश्वरो
जीयाद् वीरनृसिंहरायनृपतिः संसारसारोदयः ॥१२॥

उक्तरीतित्रययुता भूरिद्वित्त्वाक्षराच्युता ।
अल्पघोषाक्षरा लाटी वृत्तिः कोमलतायुता ॥१३॥

गङ्गातुङ्गतरङ्गशारदघनक्षीराब्धिचन्द्रातपः
श्रीराजद्वरकीर्तिभासुरगुणो गम्भीरचित्तस्मरः ।
नानावाग्मिकवीश्वरस्तुतगुणः सर्वज्ञकल्पो महान्
श्रीवीरो नरसिंहबङ्गनृपतिर्जीयाद्धरित्रीतले ॥१४॥

शृङ्गारः करुणः शान्तो हास्यो मधुरतागुणः ।
ओजोगुणयुताः शेषा रसाः पञ्च निरूपिताः ॥१५॥

प्रसादगुणसंयुक्ता रसाः सर्वे नव स्मृताः ।
शेषाः सप्तगुणा योज्या यथायोगं विशारदैः ॥१६॥

रीतिनीरेजषण्डेद्धमहाकाव्यसरोवरे ।
कुरु केलीविधिं राजहंसदेशीयरायराट् ॥१७॥

इति रीतिनिश्चयो नाम षष्ठः परिच्छेदः ।

■

---

१. कुमार्यौ सुकुमारत्व°

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# वृत्तिनिश्चयो नाम

## सप्तमः परिच्छेदः

वृत्तिशून्यो न सूत्रार्थो नृणां चेतसि भासते ।
वृत्तिरिक्तं तथा काव्यं रसिकाय न रोचते ॥१॥
वृत्तीनां लक्षणं [1]तासां भेदोऽपि प्रणिगद्यते ।
शृणु कादम्बदुग्धाब्धिजातकौस्तुभ रायराट् ॥२॥
सरसार्थौघसंदर्भलक्षणा वृत्तिरिष्यते ।
कैशिक्यारभटी भारती मता सात्वती बुधैः ॥३॥
अत्यन्तकोमलार्थानां शृङ्गाररसयोगिनाम् ।
[2]करुणाख्यरसे वाचां संदर्भो वाथ कैशिकी ॥४॥
अत्यन्तकर्कशार्थाना रौद्रबीभत्सयोगिनाम् ।
संदर्भरूपारभटी वृत्तिरुक्ता कवीश्वरैः ॥५॥
हास्यशान्ताद्भुतरसोपेतार्थानां पृथक् पृथक् ।
ईषन्मृदूनां संदर्भो भारतीवृत्तिरुच्यते ॥६॥
ईषत्कठिनवाच्यानां संदर्भः सात्वतीष्यते ।
भयानकेन वीरेण रसेन सह योगिनाम् ॥७॥
शृङ्गारकरुणौ लोकेऽत्यन्तकोमलतां गतौ ।
अत्यन्तकठिनौ रौद्रबीभत्सौ रसनामकौ ॥८॥
हास्यः शान्तोऽद्भुतश्चेति स्वल्पकोमलतां गताः ।
ईषत्काठिन्यसंपृक्तौ मतौ वीरभयानकौ ॥९॥
चतसृणां वृत्तीनां क्रमेण निदर्शनानि निरूप्यन्ते ।

१. तस्या, २. करुणाख्यरसेदानां ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कैशिकी यथा –

शृङ्गाररसारतरुणीजनकोमलाङ्ग-
सर्वस्वचारुवनवृन्दवसन्तकल्पः ।
नारीकटाक्षशरजालविताड्यमानः
श्रीरायनायकवरः सुकृतीति भाति ॥१०॥

आरभटी यथा –

घण्टाटङ्कारभीकृद्रणपटुतरगन्धेभविभ्राजमानः
कोपाजापेन राजत्प्रलयगतमहावह्निकीलाभकेन ।
धिक्कुर्वन् वैरिवर्गं गुरुविपिनसमं शाकिनीढाकिनीभ्यो
दत्त्वा रक्तास्थिमज्जाबहुपललबलिं भाति रायो रणाग्रे ॥११॥

भारती यथा—

कीर्तिस्तेऽप्यतिलङ्घते जगदिदं गम्भीरिमा वारिधिं
हस्तः कल्पतरुं पराक्रमगुणः कण्ठीरवं धीरता ।
स्वर्णाद्रिं नयजालमुग्रभरतं सत्यं च भीमाग्रजं
रूपं मन्मथभूभुजं मृदुवचःपीयूषपिण्डं नृप ॥१२॥

सात्वती यथा—

संग्रामाङ्गणभूतले प्रलयकालाग्निस्फुलिङ्गाकृति-
क्रोधाडम्बररक्तलोचनयुगं श्रीरायचक्रेश्वरम् ।
दृष्ट्वा वैरिनृपा भयज्वरवशान्मूर्च्छन्ति केचित् परे
दानन्ति प्रतपन्ति यान्ति शरणं वल्मीकवीराधिकम्(?)॥१३॥

अत्यन्तकोमलार्थार्थिऽल्पप्रौढसंदर्भलक्षणा ।
मध्यमा कैशिकी सर्वरससाधारणा मता ॥१४॥

---

१. नयजालमुदघभरतं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईषन्मृदुसंदर्भाप्यतिप्रौढार्थगोचरा ।
मध्यमारभटी सर्वरससाधारणा स्मृता ॥१५॥

शब्दगतप्रसादमाधुर्यादिदशगुणाश्रितानामर्थविशेषनिरपेक्षाणां वैदर्भ्यादिरीतीनामर्थविशेषापेक्षविशिष्टकैशिक्यादिवृत्तिभ्यो भेदो द्रष्टव्यः ।

असंयुक्तमृदुवर्णबन्धोऽतिमृदुसंदर्भः । संयुक्तकोमलवर्णबन्ध ईषन्मृदुसंदर्भः । अविकटपरुषवर्णबन्ध ईषत्प्रौढसंदर्भः । प्रागुक्तसंदर्भचतुष्टयस्य लक्षणचतुष्टयं ज्ञातव्यम् ।

सद्वृत्तिबालविलसद्गुणप्रभावे
सत्काव्यबन्धगगने तव कीर्तिचन्द्रः ।
लोकस्य तापहरणे चतुरो मनोज्ञः
[1]कादम्बनाथ चिरकालमयं विभातु ॥१६॥

इति वृत्तिनिश्चयो नाम सप्तमः परिच्छेदः ।

■

१. नादञ्जनाथ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# शय्यापाकनिश्चयो नाम

## अष्टमः परिच्छेदः

अशय्या कामकेली वा कृतिर्लोके न शोभते ।
यतस्ततो बुधैर्वाच्यं शय्यालक्षणमुत्तमम् ॥ १ ॥
पदानामानुगुण्यं वान्योन्यमित्रत्वमुच्यते ।
यत् सा शय्या कलाशास्त्रनिपुणैर्विदुषां वरैः ॥ २ ॥
कादम्बेश्वररायबङ्गनृपतेः सत्कीर्तिजालं मह-
ल्लोकाभोगविराजितं कविजनैः क्षीराब्धिरित्युच्यते ।
कल्पानोकहपुष्पमम्बरनदीनीहारजालं हर-
स्तत् सर्वं सदृशं न तेन तदिदं तस्योपमां गच्छतु ॥ ३ ॥
अपूर्वं भोज्यमप्यत्र निःपाकं नैव रोचते ।
अपाककाव्यबन्धोऽपि ततः पाको निरूप्यते ॥ ४ ॥
चतुर्विधानामर्थानां गाम्भीर्यं पाक उच्यते ।
द्राक्षापाको[1] नालिकेरपाकोऽयं द्विविधो मतः ॥ ५ ॥
आलम्ब्य शब्दमर्थस्य द्राक् प्रतीतिर्यतोऽजनि ।
स द्राक्षापाक इत्युक्तो बहिरन्तःस्फुरद्रसः ॥ ६ ॥
आलम्ब्य शब्दमर्थस्य द्राक्प्रतीतिर्यतो न हि ।
स नालिकेरपाकः स्यादन्तर्गूढरसोदयः ॥ ७ ॥

द्राक्षापाको यथा—

रायनाथमनोज्ञाङ्गे लावण्यममृतोपमम् ।
आलोकनेन तरुणी पीत्वा पीत्वा प्रमोदते ॥ ८ ॥

---

१. नालिकेरपाकश्च ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नालिकेरपाको यथा—

चन्द्रं दृष्ट्वा सरोजं विकसति मधुरं नीलनीरेजयुग्मं
संकोचं याति कोकद्वयममितसुखं याति राहुश्च याति ।
भृङ्गीसंकाशमन्दं तिमिरमभिमुखं याति बालातपश्च
श्रीरायः कामतन्त्री मनसिजनृपतन्त्रस्य जानाति तत्त्वम् ॥९॥

शय्याविरेजसंयुक्ते पाकपानीयभासुरे ।
काव्यपद्माकरे रायकीर्तिहंसो विराजताम् ॥ १० ॥

इति शय्यापाकनिश्चयो नाम अष्टमः परिच्छेदः ।

■

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# अलंकारनिर्णयो नाम

## नवमः परिच्छेदः

स्त्रीरूपं निरलंकारं न विभाति यथा भुवि ।
तथा काव्यं ततो ब्रूहि नानालंकारसंग्रहम् ॥ १ ॥
काव्याङ्गभूतौ शब्दार्थौ श्रिताश्चित्रोपमादयः ।
अलंकाराः प्रकीर्त्यन्ते काव्यचारुत्वहेतवः ॥ २ ॥
काव्यशोभाकरः काव्यधर्मोऽलंकार उच्यते ।
काव्यप्रयुक्तशब्दार्थान्समालम्ब्य प्रवृत्तिमान् ॥ ३ ॥
शब्दार्थयोरलंकारौ द्विविधौ परिकीर्तितौ ।
यमकं चित्रवक्रोक्तिरनुप्रासश्चतुर्विधः ॥ ४ ॥
शब्दालंकृतयः प्रोक्ता अर्थालंकृतयः पुनः ।
स्वभावोक्त्यादिभेदेन बहुधा प्रतिपादिताः ॥ ५ ॥
गम्भीरामलसूक्तिरत्नविलसत्सत्कीर्तिफेनाम्बुधे
वैरिध्वान्तविघातदक्षसकलोपायाम्बुजश्रीकर ।
भानो भासुररूपचारुललनारत्युत्सवानन्दकृत्–
कन्दर्पाद्भुतभूषणानि शृणु भो श्रीरायबङ्गप्रभो ॥ ६ ॥
विहाय शब्दालंकारमर्थालंकार उच्यते ।
अर्थमाश्रित्य काव्यस्य चारुत्वं जनयत्यसौ ॥ ७ ॥
स्वभावोक्त्युपमे रूपकावृत्ती हेतुदीपके ।
उत्प्रेक्षार्थान्तरन्यासौ व्यतिरेकविभावने ॥ ८ ॥
आक्षेपातिशयौ सूक्ष्मसमासौ च लवक्रमौ ।
उदात्तापह्नुती प्रेयोविरोधौ रसवत्तथा ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऊर्जस्व्यप्रस्तुतस्तोत्रे विशेषस्तुल्ययोगिता ।
पर्यायोक्तं सहोक्तिश्च परिवृत्तिः समाहितम् ॥ १० ॥
श्लिष्टं निदर्शनं व्याजस्तुतिराशीस्समुच्चयः ।
वक्रोक्तिरनुमानं च विषमावसरौ तथा ॥ ११ ॥
प्रतिवस्तूपमा सारं भ्रान्तिमत्संशयौ तथा ।
एकावली परिकरः परिसंख्या ततः परम् ॥ १२ ॥
प्रश्नोत्तरं संकरश्च समुद्देशः कृतः क्रमात् ।
एतेषां लक्षणं लक्ष्यं प्रोच्यते च यथाक्रमम् ॥ १३ ॥
येन रूपेण यद्वस्तु वर्तते तस्य वस्तुनः ।
तेन रूपेण कथनं स्वभावोक्तिः प्रकीर्त्यते ॥ १४ ॥
सक्रियं निष्क्रियं वस्तु यथा जगति वर्तते ।
तथा तद्रूपकथनं जातिरित्युच्यतेऽथवा ॥ १५ ॥

सक्रियवस्तुजात्युदाहरणं यथा—

कारुण्योपेतचित्तः सकलजनततेः पालको धैर्यशाली
राजद्राजाधिराजोत्करमणिमुकुटप्रोल्लसत्पादपद्मः ।
राज्यश्रीभारधारी सकलगुणगणोद्भासिपञ्चाङ्गमन्त्रः
सिद्धीशो रायबङ्गक्षितिपतिरधुना भाति शक्तित्रयाढ्यः ॥१६॥
हरिनीलच्छविभासुरा वनगजोदीर्णोरुमुक्तावली-
कृतदिव्याभरणा वरालिनिभधम्मिल्लास्ता मृगीलोचनाः ।
वरझिण्टीकृतमालिका निजकराश्लिष्टात्मजातोत्करा
[1]वररायावनिपं किरातवनिताः पश्यन्ति दूरादिमाः ॥ १७ ॥

हीनेषु त्रस्तेषु बालादिषु च विशेषतो रम्या जातिरिति द्वितीयनिदर्शनम् ।

निष्क्रियोदाहरणं यथा—

---

१. दुर० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयं श्रीरायभूमीशस्त्रिवर्गकलितो महान् ।
शूरो धीरो महात्यागी राजनीतिविशारदः ॥ १८ ॥
आरामे रायबङ्गस्य कोकिलाः श्यामविग्रहाः ।
मधुरस्वरसंपृक्ता वसन्ते चित्तहारिणः ॥ १९ ॥

कलकण्ठजातिस्वभाववर्णनम् ।

चुम्बति स्पृशति प्राणनायिकां जिघ्रति क्षणम् ।
पिबति प्रेक्षते गाढमालिङ्गति च रायराट् ॥ २० ॥

क्रियास्वभाववर्णनम् ।

रतौ रायमहीनाथे सुखमन्तातिगं महत् ।
कामसिद्धान्तविज्ञानं कामिनीचित्तरञ्जकम् ॥ २१ ॥

कलाज्ञानकामसुखगुणस्वभाववर्णनम् ।

कोटीरराजितो हारदिव्यकुण्डलभूषितः ।
सिंहासनसमारूढो रायबङ्गो विराजते ॥२२॥

किरीटहारादिविशिष्टद्रव्यस्वभाववर्णनम्[1] । जातिक्रियागुणद्रव्यस्वभावापेक्षया जात्यलंकारश्चतुर्विधः । पक्षान्तरमिदम् ।

येनोपमीयते यत्र यत्किंचिद्येन केनचित् ।
प्रकारेणोपमा सा तस्या भेदोऽयं प्रतन्यते ॥ २३ ॥
कादम्बनाथ सा कीर्तिर्धवला कौमुदीव ते ।
प्रतापमण्डलं रक्तं भाति बालार्कबिम्बवत् ॥ २४ ॥

धावल्यरक्तत्वधर्माभ्यामुपमेति धर्मोपमा ।

श्रीरायभूप कीर्तिस्ते शारदी कौमुदीव सा ।
तेजोमण्डलमुद्याति बालभास्करबिम्बवत् ॥ २५ ॥

अत्र धर्मनिरूपणं न कृतमिति उपमानोपमेयवस्तुमात्रकथनाद् वस्तूपमा ।

---

१. °द्रव्यविशिष्ट° ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाभागस्य रायस्य कामं दोग्धि महान्करः ।
कामधेनुरिवाशेषजगदानन्ददायिनः ॥ २६ ॥

कामधेनौ कामदोहकत्वप्रसिद्धिः । विपर्यासेन हस्ते निरूप्यत इति विपर्यासोपमा ।

कादम्बनाथ कीर्तिस्ते शारदी कौमुदीव सा ।
शारदी कौमुदी भाति त्वत्कीर्तिरिव विष्टपे ॥ २७ ॥

परस्परोत्कर्षशंसिनी चान्योन्योपमा ।

श्रीराय कीर्तिजालं ते तुल्यं क्षीराब्धिनैव तत् ।
अन्येन केनचित् साम्यं न प्रयाति जगत्त्रये ॥ २८ ॥

परवस्तुसादृश्य[1]व्यावृत्तेर्नियमोपमा ।

कादम्बेश्वर कीर्तिस्ते चन्द्रातपसमाभवत् ।
अस्ति चेत् सदृशं वस्तु तत्समापि विराजताम् ॥ २९ ॥

अन्यसादृश्यसंभवकथनादनियमोपमा ।

इन्दुमन्वेति कीर्तिस्ते कान्त्या चाह्लादनेन च ।
भानुमन्वेति तेजस्ते महिमा रागतोऽपि च ॥ ३० ॥

आह्लादनकान्तिमहत्त्वारुणत्वधर्मसमुच्चयात् समुच्चयोपमा ।

श्रीराय भवतः कीर्तिर्विशाला भवदाश्रया ।
सुधाकराश्रया ज्योत्स्ना भिदैवेयं न चेतरा ॥ ३१ ॥

भेदान्तरनिरासेन अतिशयोपमा ।

त्वत्कीर्ताविव धावल्यं न कौमुद्यां तदस्ति चेत् ।
शारदाभ्राभ्रगङ्गादावपि श्रीराय विद्यते ॥ ३२ ॥

साधारणधावल्यस्य अन्यथाकल्पनादुत्प्रेक्षोपमा ।

शारदी कौमुदी सप्तवार्धिं यदि विलङ्घते ।
वर्तेते यदि नित्यं सा धत्तां कीर्तेस्तवोपमाम् ॥ ३३ ॥

---

१. °निर्मितेर्नियमोपमा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तवार्धिलङ्घननित्यवर्तनस्य असंभविनः कथनादद्भुतोपमा ।

चकोरनिकरो दृष्ट्वा त्वत्कीर्तिरिति कौमुदीम् ।
उपेक्ष्य भवतः कीर्ति याति ज्योत्स्नेति विभ्रमात् ॥ ३४ ॥

मोहोपमा ।

सकलङ्कः सुधांशुः किं किं साकाशं यशस्तव ।
कम्पते जनताचित्तमिति श्रीरायभूपते ॥ ३५ ॥

संशयोपमा ।

इन्दुना जीयते पुण्डरीकं त्वत्कीर्तिरेव तत् ।
सकलङ्केन्दुजयिनी पुण्डरीकं यतस्ततः ॥ ३६ ॥

निर्णयोपमा ।

धवला श्रीमती सर्वजनसंतापहारिणी ।
कादम्बराय कीर्तिस्ते राजते कौमुदी यथा ॥ ३७ ॥

श्लेषोपमा ।

साम्बरराज विभाति (च) कौमुद्यत्यन्तवर्धिनो भाति [?] ।
रायनृप कौमुदी वा कीर्तिस्ते सर्वदा भुवने ॥ ३८ ॥

उपमानोपमेययोः सदृशरूपशब्दवाच्यत्वात् [1] संतानोपमा ।

क्षीराब्धिना समानापि कीर्तिस्ते शीतभानुना ।
क्षीराब्धिः पीडितो देवैः सकलङ्कः सुधाकरः ॥३९॥

निन्दोपमा ।

क्षीराब्धिरमृतस्थानं चन्द्रः संतापहृत् सदा ।
क्षीराब्धिचन्द्रौ त्वत्कीर्त्या सदृशौ राय धीधन ॥४०॥

प्रशंसोपमा ।

---

१. In Kāvyādars'a this variety of Upamā is known as Samānopamā ( v.l. सन्दानोपमा, सरूपोमा )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षीरवाराशिना तुल्या त्वत्कीर्तिरिति मे मनः ।
आचिख्यासति दोषो वा गुणो वा भवतु प्रभो ॥४१॥

आचिख्यासोपमा ।

पुण्डरीकं चन्द्रबिम्बं त्वद्यशस्त्रितयं प्रभो ।
परस्परविरुद्धं भो भाति कादम्बरायराट् ॥४२॥

विरोधोपमा ।

भुवनव्यापिनीं कीर्तिं भवदीयां सदातनीम् ।
पुण्डरीकं न शक्नोति जेतुं तादृक् क्रमोज्झितम् ॥४३॥

प्रतिषेधोपमा ।

त्वत्कीर्तिः स्वाङ्गसंजाता क्षीराब्धिजनितो विधुः ।
तथापि सम एवेन्दुर्नाधिको रायभूपते ॥४४॥

चटूपमा ।

न कौमुदीयं कीर्तिस्ते न भानुस्तेज एव हि ।
न राहुः खड्ग एवायं प्रचण्डतरविक्रम ॥४५॥

सुव्यक्तसादृश्यसंभवात्तत्त्वाख्यानोपमा ।

क्षीराब्धिशारदाभ्रादिवस्तूनामुपमां सदा ।
विलङ्घ्य भूरिकीर्तिस्ते धत्ते स्वेनैव तुल्यताम् ॥४६॥

असाधारणोपमा ।

क्षीराब्धिशरदिन्द्वादिश्वेतवस्तुप्रभावति ।
एकत्रमिलितेवेयं कीर्तिस्ते राय राजते ॥४७॥

वृत्तिरियं कदापि नाभूदिति अभूतोपमा ।

अमावास्यातिथौ रात्रौ शारदी चन्द्रिका यथा ।
कलौ काले तथा भाति कीर्तिस्ते रायमन्मथ ॥४८॥

असंभावितोपमा ।

शरच्चन्द्रनभोगङ्गाशारदाभ्रपयोर्णवान् ।
अन्वेति हारनीहारौ कीर्तिस्ते रायकायज ॥४९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहूपमा ।

शरदिन्दोरिवोत्पन्ना जनितेव पयोम्बुधेः ।
शरदभ्रादिवोद्भूता कीर्तिस्ते भाति रायराट् ।।५०।।

विक्रियोपमा ।

इन्दौ ज्योत्स्नेव दुग्धाब्धौ चन्द्रो वा दुग्धवारिधिः ।
धरायामिव कीर्तिस्ते भाति श्रीरायभूपते ।।५१।।

मालोपमा ।

श्रित्वा रायनृपं भाति कीर्तिर्लोकत्रये भृशम् ।
श्रित्वा सुधाकरं व्योम्नि कौमुदीव सुनिर्मले ।।५२।।

वाक्यार्थेन कश्चिद्वाक्यार्थो यद्युपमीयते सा वाक्यार्थोपमा। सा पुनर्द्विविधा एकेवशब्दा अनेकेवशब्दा इतीयमेकेवशब्दा वाक्यार्थोपमा ।

इन्दोरिव नृसिंहस्य कीर्तिं ज्योत्स्नामिवामलाम् ।
चकोरीव विलोक्यासौ जनता याति संमदम् ।।५३।।

इयमनेकेवशब्दा वाक्यार्थोपमा ।

नृसिंहराय कीर्तिस्ते जगत्येकैव राजते ।
एक एव नभोमार्गे ननु भाति सुधाकरः ।।५४।।

इवादिशब्दप्रयोगाभावेऽपि साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा ।

आह्लादनाय देवानां ज्योत्स्ना वसति चन्दिरे ।
नृलोकवर्तिजीवानां कीर्तिः कादम्बभूपतौ ।।५५।।

एकक्रियाविधौ अधिकेन हीनं सदृशीकृत्य कथनं तुल्ययोगोपमा ।

रूपेणाङ्गजवत्कलायुततया शीतांशुवत्तेजसा
तीक्ष्णेनार्कवदद्भुतोन्नततया देवाद्रिवत् संपदा ।
देवाधीशवदुद्धतविक्रमतया पञ्चास्यवद्राजते
गाम्भीर्येण समुद्रवज्जयति सः श्रीरायबङ्गो भुवि ।।५६।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हेतूपमा ।

उद्वेगो विदुषां यत्र नास्ति तत्रोपमा मता ।
लिङ्गस्य वचनस्यापि भेदे हीनेऽधिकेऽपि च ॥५७॥

शारदाभ्रमिवापूर्वा कीर्तिस्ते चन्द्रिका इव ।
भवानिव महामेरुस्त्वं सुरेन्द्र इवासि भो ॥५८॥

चतुर्णामिकः श्लोकः ।

उद्वेगो यदि वर्तेत भिन्नलिङ्गादिके सति ।
तत्रोपमा न वक्तव्या कलागमविशारदैः ॥५९॥

बलाकेव शरच्चन्द्रो वेशन्त इव वारिधिः ।
ग्रामस्वामीव देवेन्द्रः प्रदीपो भानुबिम्बवत् ॥६०॥

एतादृशी सभासद्भिर्न वक्तव्या कदाचन ।
धर्ममात्रविवक्षायामुपमा कीर्त्यते बुधैः ॥६१॥

शृगालवत्पुरालोकी मुनिराजो विराजते ।
अकृतावासको लोके फणीव मुनिसत्तमः ॥६२॥

यथेववाद्यव्ययानि कल्पादिप्रत्ययास्तथा ।
अब्जास्यादिसमासश्च निभादिसमवाचकाः ॥६३॥

उपमालंकृतावेते शब्दा वाच्याः कवीश्वरैः ।
स्पर्धते हसतीत्यादि शब्दा वाच्याश्च कोविदैः ॥६४॥

यत्रोपचर्यतेऽभेद उपमानोपमेययोः ।
तद्रूपकमलंकारस्तस्य भेदः प्रतन्यते ॥६५॥

कान्ता ताटङ्कचक्रं विरचितकबरीबन्धकान्तारदुर्गं
लावण्याम्भस्सुदुर्गं घनकुचगिरिदुर्गं नखोदारखड्गः ।
चक्षुर्लीलावलोकामितनुतशरजालं लसद्दृष्टिकेतुः
कन्दर्पालापमन्त्रो विलसति चतुरो रायकन्दर्पराज्ये ॥६६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समस्तरूपकम् ।

श्रीरायो जलधिः सुधांशुरमृतं मेरुः सुरानोकहो
भानुः सिद्धरसो मनोजनृपतिश्चिन्तामणिर्देवराट् ।
भोगीन्द्रः सुरधेनुरम्बरमिदं काले कलौ सर्वदा
भूत्वा तीर्थकरोऽपि सर्वजनतानन्दाय संवर्तताम् ॥६७॥

व्यस्तरूपकम् ।

कामिन्याः पदपङ्कजेद्धमधुपो वक्त्राब्जसंवर्धिता-
म्बोधिस्त्वं वरनाभिचारुसरसि श्रीराजहंसः सदा ।
अङ्कालाननिबद्धभावजगजस्तुङ्गस्तनाद्रिस्थित-
व्याधोऽपाङ्गनिरीक्षणेषुविलसल्लक्ष्योऽसि बङ्गप्रभो ॥ ६८ ॥

समस्तव्यस्तरूपकम् ।

श्रीरायस्य मुखेन्दुस्ते (? श्च) स्मितज्योत्स्नाविराजितः ।
कस्तूरीतिलकाङ्केद्धो भाति सूक्तिसुधारसः ॥ ६९ ॥

स्मितादिषु ज्योत्स्नादित्वं मुखे च चन्द्रत्वमारोप्य तद्योग्यस्थान-विन्यासादेतत् सकलरूपकम् ।

स्मितज्योत्स्नां मुखं धत्ते कस्तूरीतिलकाङ्कनम् ।
सूक्तिपीयूषसारं ते कादम्बेश्वर रायराट् ॥ ७० ॥

मुखस्यावयवानां स्मितादीनां ज्योत्स्नादिष्वारोपाद् अवयविनो मुखस्यानारोपाद् अवयवरूपकम् ।

मुखेन्दुस्ते जनानन्दं करोति भ्रूविराजितः ।
विशालनेत्रो निटिलं धरन् श्रीरायभूपते ॥ ७१ ॥

अत्र भ्रूनेत्रनिटिलानामवयवानामनारोपः अवयविनो मुखस्य चन्द्रत्वारोपाद् अवयविरूपकम् ।

---

१. व्यादोपांग, २. मुखदत्ते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुखं विशालनेत्रं ते कपोलादर्शभासुरम् ।
दृष्ट्वा रज्यति लोकोऽयं रायकादम्बनायक ।। ७२ ।।

अत्र मुखस्यावयविनोऽनारोपाद् एकस्यावयवस्य कपोलस्य दर्पणत्वमारोप्य नेत्रस्यानारोपाद् एकावयवरूपकम् । एवं द्व्यवयवरूपकं त्र्यवयवरूपकमित्यादि योज्यम् ।

स्मितज्योत्स्नाविलासं ते चारुनेत्रचकोरकम् ।
दृष्ट्वा मुखं मुदं याति नारीवृन्दं नृसिंह भो ।। ७३ ।।

अत्र ज्योत्स्नाचकोराणां संगे सति युक्तरूपकमिदम् ।

नारीजनो मुखं दृष्ट्वा नेत्रेन्दीवरभासुरम् ।
स्मितचन्द्रिकया युक्तं मोदते तव रायराट् ।। ७४ ।।

अत्र चन्द्रिकेन्दीवरयोरयोगाद् अयुक्तरूपकमिदम् ।

मुखेन्दुना कपोलाक्षिभ्रूयुगाधरशालिना ।
त्वं रूपकेतुर्नारीणां करोषि रतिसंमदम् ।। ७५ ।।

अवयविनो रूपणादवयवानां रूपणारूपणाद् विषमं रूपकम् ।

कादम्बनाथ लोकेऽत्र भवानेव विराजते ।
जगन्मोहकरापूर्वरूपभासुरमन्मथः ।। ७६ ।।

विशेषणविशिष्टमन्मथारोपणात्सविशेषणरूपकम् ।

रायप्रतापभानुस्ते न मीलयति कैरवम् ।
अस्मत्पतिविभूत्यब्जषण्डं संकोचयत्यहो ।। ७७ ।।

भानुकार्यस्य अकरणदर्शनादितरकार्यस्य करणदर्शनाच्च विरुद्धरूपकम् ।

तुङ्गत्वेन महामेरुर्मन्मथो रूपसंपदा ।
विभूत्या सुरराजोऽसि रायकादम्बनायक ।। ७८ ।।

तुङ्गत्वादिहेतुना कनकाचलादिरारोप्यत इति हेतुरूपकम् ।

अतिरक्तं बालभानुं विडम्बयति गर्वतः ।
तेजोभानुरयं रक्तो भवतो रायभूपते ।। ७९ ।।

तेजोभानुबालभान्वोर्गौणमुख्ययोः साधर्म्यदर्शनादुपमारूपकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अरुणः पद्मिनीं तेजोभानुर्वीर श्रियं तव ।
आनन्दयति रक्तोऽसौ कदाचित्सर्वदाप्ययम् ॥ ८० ॥

अनयोर्भान्वोर्वैधर्म्यदर्शनाद् व्यतिरेकरूपकम् ।

तेजोभानुस्समो भानुर्यदि तापविधानतः ।
ततोऽन्योऽपि ततस्तस्य न संवादी तवाधिप ॥ ८१ ॥

भानुसाम्यप्रतिषेधादाक्षेपरूपकम् ।

कटाक्षचन्द्रिकापीयं परसंतापहारिणी ।
संतापयति मां देव मत्पापं तव रायराट् ॥८२॥

आक्षेपस्य समाधानकरणात् समाधानरूपकम् ।

सत्कीर्तिचन्द्रिकाहारं धृत्वा दिक्कामिनीरतिः ।
श्रीरायचन्द्रकन्दर्पं श्रुत्वा गायति गायति ॥८३॥

रूपकरूपकम् ।

नायं रायः [1]सुधासूतिर्नेयं कीर्तिश्च कौमुदी ।
नेदं तिलकमङ्कोऽयं नाधरो वटपल्लवम् ॥८४॥

रायनृपत्वादिकं निवर्त्य चन्द्रादित्वेन रूपणात् प्रकटीकृतगुणातिशयं तत्त्वापह्नुतिरूपकम् ।

त्रयस्त्रिंशत् समाख्याता उपमालंकृतेर्भिदाः ।
विंशती रूपकस्यापि भेदाः प्रोक्ता मया पुनः ॥८५॥
अन्तो नास्ति विकल्पानामुपमारूपकद्वये ।
दिङ्मात्रं कथितं शेषो विचार्यो बुद्धिशालिभिः ॥८६॥
उक्तस्य पुनरुक्तिः स्याद्बहुधावृत्तिरीरिता ।
अर्थावृत्तिः पदावृत्तिरुभयीति त्रिधा मता ॥८७॥

अर्थावृत्तिर्यथा –

रुवन्ति कोकिलाः कीरा वदन्ति मधुपा वने ।
वदन्ति राजहंसाश्च रणन्ति [1]श्रीधरेशितुः ॥८८॥

---

१. श्रीधरेशिनः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदावृत्तिर्यथा –

श्रीरायक्षितिनाथकीर्तिवनिता भाति त्वदीया भृशं
सप्ताम्बोधिषु भाति सर्वगगने सर्वत्र दिग्मण्डले ।
भाति क्ष्मासु च भाति भाति सकले स्वर्गेऽप्यधोविष्टपे
भातीयं कविराजचारुवचने भातीयमत्यद्भुता ॥८९॥

उभयावृत्तिर्यथा –

क्रीडयत्यङ्गनालोको भवान् नृपगृहे सदा ।
गुहासु क्रीडयत्यद्य नारीवर्गं रिपुव्रजः ॥९०॥

एतदावृत्त्यलंकारत्रयं दीपकालंकारस्थान एव संमतम् ।

हिनोति कार्यं व्याप्नोति ज्ञाप्यं वा हेतुरुच्यते ।
उत्पत्तिसाधनत्वेन ज्ञप्तिसाधनतोऽपि वा ॥९१॥

कारकज्ञापकौ हेतू उत्पत्तिज्ञप्तियोग्यकौ ।
यत्रोच्येते स हेत्वाख्योऽलंकारोऽनेकधा मतः ॥९२॥

हरिचन्दनहारेण मल्लिकामालया युतः ।
प्रीतिं करोति नारीणां शृङ्गारार्णवचन्द्रमाः ॥९३॥

निर्वर्त्यकारकविषयहेत्वलंकारः ।

आरक्तमालतीमालातिलकाभरणोज्ज्वलः ।
आलिङ्ग्य नायिकां नाथश्चिन्ताभावाय कल्पते ॥९४॥

अभावरूपनिर्वर्त्यविषयहेत्वलंकारः । पूर्वो भावविषयः ।

रूपातिशयसंपन्नो नुतदक्षिणनायकः ।
रायबङ्गो व्यधात् स्त्रीणां मनःकौतूहलान्वितम् ॥९५॥

विकार्यविषयकारकहेत्वलंकारः ।

इक्षुचापसमाकारः कामसिद्धान्तवेद्यसौ ।
रायबङ्गोऽवनीनाथो नारीरूपं प्रपश्यति ॥९६॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राप्यविषयकारकहेत्वलंकारः ।

तव पल्लववज्रेण [1]मुक्तेनार्धसुधांशुना ।
मनः सुबोधमित्येवं नायिका वक्ति नायकम् ॥९७॥

ज्ञापकहेत्वलंकारः ।

जातिक्रियागुणद्रव्यसंज्ञाभेदाभिधायिना
आदिमध्यान्तवृत्तेन पदेनैकत्रवर्तिना ।
वाक्यार्थनिर्णयो यत्र भवेत्तद्दीपकं मतं
बहुधा वर्तमानस्य तस्य लक्ष्यं प्रतन्यते ॥९८॥

कोकिला रणनं कृत्वा नृसिंहं मोदयन्त्यलम् ।
खेदयन्ति च कान्तायाः खण्डिताया मनः परम् ॥९९॥

आदिवर्तिजातिपददीपकालंकारः ।

चरन्ति मदनोद्याने नृसिंहरमणीजनाः ।
त्वद्वैरिवनितालोका विपिनेषु गुहासु च ॥१००॥

आदिवर्तिक्रियापददीपकालंकारः ।

रक्तं कादम्बनाथेऽस्मिन् कामिनीनां मनो भृशम् ।
प्रजानां मित्रलोकानां चित्तं च विदुषामपि ॥१०१॥

आदिवर्तिगुणपददीपकालंकारः ।

हारेण रायबङ्गस्य कण्ठस्थेन मनो हृतम् ।
नारीजनस्य शीतांशोर्मयूखोऽपि तिरस्कृतः ॥१०२॥

आदिवर्तिद्रव्यपददीपकालंकारः ।

चैत्रेण सेवकेनासौ रायबङ्गो विनम्यते ।
पश्चाद्राजाधिलोकस्य वार्ता सम्यग्निरूप्यते ॥१०३॥

---

१. मुक्त.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदिवर्तिसंज्ञापददीपकालंकारः ।

आरामे रायबङ्गस्य नृत्यं कुर्वन्ति केकिनः ।
प्रेक्षकाणां जनानां च जनयन्ति मनोमुदम् ॥१०४॥

मध्यवर्तिजातिपददीपकालंकारः ।

रायबङ्गमनोजातं नारीलोको विलोकते ।
दिदृक्षावशतो गत्वा देवनारीजनोऽपि च ॥१०५॥

मध्यवर्तिक्रियापददीपकालंकारः ।

सत्कीर्त्या रायबङ्गस्य नृलोको धवलीकृतः ।
पाताललोकसर्वस्वमूर्ध्वलोकोऽपि भासुरः ॥१०६॥

मध्यवर्तिगुणपददीपकालंकारः ।

कादम्बनायको हारभूषितो नृपरायराट् ।
आस्ते सिंहासने दिव्ये पूज्यते च नरेश्वरैः ॥१०७॥

मध्यवर्तिद्रव्यपददीपकालंकारः ।

कादम्बेशेन रायेण डित्थोऽयं परिपालितः ।
अत एव निजावासे स्थित्वा दीर्घं प्रमोदते ॥१०८॥

मध्यवर्तिसंज्ञापददीपकालंकारः ।

कादम्बरायसदनाद्बहिरुद्यानवासिनः ।
वदन्ति मधुरालापं फलं चुम्बन्ति ते शुकाः ॥१०९॥

अन्त्यवर्तिजातिपददीपकालंकारः ।

कादम्बरायभूनाथं कुसुमायुधसंनिभम् ।
दृष्ट्वा मुदं स्वकीयोऽपि परकीयोऽपि ढौकते ॥११०॥

अन्त्यवर्तिक्रियापददीपकालंकारः ।

कादम्बरायनाथस्य सत्कीर्त्या विमलात्मना ।
जायते मानवानां च स्वर्गिणामपि सत्सुखम् ॥ १११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्त्यवर्तिगुणपददीपकालंकारः ।

सिंहासने महारत्नकीलिते प्रतिभासते ।
क्रीडत्यारामसंदोहे हारालंकृतरायराट् ॥ ११२ ॥

अन्त्यवर्तिद्रव्यपददीपकालंकारः ।

कादम्बनाथं रायेन्द्रं लोकते प्रणमत्यपि ।
नानादेशगतां वार्तां ब्रूते रम्यां कपिध्वजः ॥ ११३ ॥

अन्त्यवर्तिसंज्ञापददीपकालंकारः ।

शास्त्रं धर्मस्य संवृद्ध्यै स च पुण्यस्य तच्छ्रियः ।
सा श्री रायमहीनाथे सुखस्य खलु जायते ॥ ११४ ॥

इति दीपकत्वेऽपि पूर्वपूर्वापेक्षया वाक्यमाला प्रयुक्तेति मालादीपकम् ।

श्रियं विपक्षवर्गस्य वर्धयन्ति चलानि वै ।
ह्रासयन्ति नृसिंहस्य मन्त्राः पञ्च सुनिश्चिताः ॥ ११५ ॥

क्रियायाः परस्परविरोधाद् विरुद्धार्थदीपकम् ।

मनोवेगयुताः सत्त्वा दिव्यलक्षणभूषिताः ।
दिवि भान्ति पतङ्गाश्वा भुवि रायतुरंगमाः ॥ ११६ ॥

मनोवेगादिधर्मेण[1] उभयेषां समानानां भानुक्रियासंबन्धात् श्लिष्टार्थदीपकम् ।

कान्तास्यं वरमीक्षते घनकुचद्वन्द्वं स्पृशत्युन्नतं
श्लिष्यत्यङ्ग[2]मनङ्गतन्त्रविदियं श्रीरायबङ्गो दरम् ।
चुम्बत्यङ्गति भावयत्यमति संस्त्रीणाति संमोदते
जानीते विनयत्युदेति कुरुते संभाषते भासते ॥ ११७ ॥

---

१. उभस्वानां २. गमनं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानाक्रियाणामेककर्तृकारकेण संबन्धादेकार्थदीपकम्[1] ।

अब्जं कूर्ममनङ्गराजशरधिं कामेभसद्बन्धना–
लानं सिंहमपूर्वसारसरसीं नागं गिरिं वल्लरिम् ।
शङ्खं शीतकरं तिलस्य कुसुमं वज्रं प्रवालं झषं
चापं भृङ्गततिं मयूरमसमं दृष्ट्वा सदा मोदते ॥ ११८ ॥

श्रीरायबङ्ग इति अध्याहारः कर्ता । एतदन्त्यक्रियादीपकं प्राक् प्रदर्शितमपि भावचमत्कारसंभवात्पुनः प्रदर्शितम् । अनया दिशा विचक्षणैर्दीपकान्तराण्यभ्यूह्यानि ।

यत्रार्थस्य स्वरूपेण विद्यमानस्य कल्पना ।
अन्यथा तमलंकारमुत्प्रेक्षाख्यं प्रचक्षते ॥ ११९ ॥
नूनं प्रायो ध्रुवं शङ्के मन्ये सत्यमिवादिभिः ।
शब्दैः प्रकाश्यते सेयमुत्प्रेक्षा कविपुङ्गवैः ॥ १२० ॥
वाच्या प्रतीयमानेति सा चोत्प्रेक्षा द्विधा मता ।
मन्ये शङ्के ध्रुवादीनां प्रयोगे प्रथमा मता ॥ १२१ ॥
मन्ये शङ्के ध्रुवादीनां शब्दानामप्रयोगतः ।
प्रतीयमानोत्प्रेक्षा तु द्वितीया विबुधैर्मता ॥ १२२ ॥
वाच्योत्प्रेक्षा पुनः प्रोक्ता षट्पञ्चाशद्विधा बुधैः ।
प्रतीयमानोत्प्रेक्षाष्टचत्वारिंशद्विधा मता ॥ १२३ ॥
तदुदाहृतिरन्यत्र बोद्धव्या बुद्धिशालिभिः ।
मूलभेदौ निरूप्येते द्वाविमौ संग्रहत्वतः ॥ १२४ ॥
शशधरसुरगङ्गा क्षीरवाराशिमुख्यान्
धवलगुणविशिष्टान् केचिदाहुः स्वतोऽमून् ।
तव विशदयशोंऽशस्पर्शनादर्जुनास्ते
सुकविविनुतवङ्गक्ष्माप मन्ये सदाहम् ॥ १२५ ॥

---

१. °रूपकम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वभावेन धवलानां चन्द्रादीनां कीर्त्यंशस्पर्शनाद् धावल्य-मन्यथा कल्पितम् । इयं वाच्योत्प्रेक्षा ।

तव तेजोगुणं लब्धुं बालभानुरयं पुनः ।
पुनः पूर्वाद्रिमारुह्य वसतीव तपस्यलम् ॥ १२६ ॥

क्रियायोगिना इवशब्देन व्यञ्जितोत्प्रेक्षा इयमपि वाच्योत्प्रेक्षा । प्रतीयमानोत्प्रेक्षायास्तु (? गुरुत्वा) तिशयाभावादुदाहरणं पूर्वशास्त्रे न कृतमिति नास्माभिरपि कृतम् ।

प्रस्तुतीकृत्य यत्किंचिद्वस्तुतस्सिद्धये पुनः ।
अन्यस्यार्थस्य योग्यो [1]योऽर्थान्तिरन्यास एव सः ॥१२७॥

कीर्तिप्रतापौ रायेण भुवनत्रयवर्तिनौ ।
लब्धौ पुण्यवता केन किं किं पुंसा न लभ्यते ॥१२८॥

विश्वव्यापिनामार्थान्तिरन्यासः ।

वक्षोरङ्गनिवासिनीं श्रियमिमां कृत्वा मुखाब्जस्थितां
वाग्देवीं जयकामिनीं विलसितां दोर्दण्डसद्मस्थिताम् ।
कादम्बक्षितिपे स्थिते वरयशस्कान्ता गृहान्निर्गता
लोके स्त्री सहते विवर्धनगतां का वा सपत्नी श्रियम्॥१२९॥

अयमपि विश्वव्यापी ।

श्रीकामिरायबङ्गोऽयं कलौ काले सतां मुदम् ।
उत्पादयति शीतांशुः कलावपि मुदे न किम् ॥१३०॥

विशेषस्यार्थान्तिरन्यासः ।

कान्तास्यचुम्बने सक्तो रायेन्द्रो याति संमदम् ।
पद्मिन्याः पङ्कजासक्तो भ्रमरः किं न तुष्यति ॥१३१॥

---

१. सो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लिष्टार्थान्तरन्यासः । भ्रमरः मधुकरः कामुक इति ध्वनिः ।
मधुद्रो भ्रमरश्चेति द्वाविमौ कामुकेऽपि च ।

नृसिंहोऽप्यभयं दत्ते श्रीरायो जगतां सदा ।
लोके विचित्रशक्तीनां वस्तूनां शक्तिरीदृशी ॥१३२॥

विरुद्धार्थान्तरन्यासः ।

नीतियुक्तोऽपि रायस्य विक्रमो वैरिणां मनः ।
संतापयति शत्रूणां पूर्वपापं हि तादृशम् ॥१३३॥

अयुक्तार्थान्तरन्यासः ।

तिलकाङ्कितरायास्यं मोदयत्यङ्गनाजनम् ।
साङ्कचन्द्रसमं तोषवर्धनं युज्यते ननु ॥१३४॥

युक्तार्थान्तरन्यासः ।

रायप्रतापभानुस्तान् संतापयतु वैरिणः ।
कीर्तिचन्द्रो धुनोतीमान् किं किं युक्तं सदोषिणः ॥१३५॥

युक्तायुक्तार्थान्तरन्यासः ।

कीर्तिज्योत्स्नापि तापाय न किं तेजो वनानलः ।
धुनोति चन्द्रपक्षश्चेद्वह्निपक्षो दहेन्न किम् ॥१३६॥

विपर्ययार्थान्तरन्यासः ।

जगत्यर्थान्तरन्यासभेदा अन्येऽपि सन्ति हि ।
तेषां निदर्शनं ज्ञेयं यथाशास्त्रं विचक्षणैः ॥१३७॥

शब्दस्य वा प्रतीतेर्वा [1]सादृश्ये विषये सति ।
वस्तुनोर्भेदकथनं व्यतिरेकस्तयोः पुनः ॥१३८॥

जगन्मोहनरूपेण कुसुमास्त्रस्य संनिभः ।
रायबङ्गस्ततस्तस्य भेदो दृश्यत्वधर्मतः ॥१३९॥

१. नादृश्ये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रायबङ्गवर्तिना दृश्यत्वधर्मेण भेदकथनादुभयगतभेदस्य प्रतीतिसिद्धत्वादेकव्यतिरेकालंकारः ।

यशःप्रतापौ भवतो जगद्व्याप्तौ कविस्तुतौ ।
यशःशारदचन्द्राभं बालभानुसमः परः ॥१४०॥

यशःप्रतापोभयभेदसाधकधावल्यरक्तत्वधर्मद्वयस्य पृथक्कथनादुभयव्यतिरेकालंकारः ।

उन्नतस्थानवृत्तोऽपि तेजस्व्यपि महानपि ।
राय त्वत्समतां याति न भानू राहुपीडितः ॥१४१॥

[२]साक्षेपव्यतिरेकालंकारः ।

धरन्नपि महाभाग्यजनितां पूर्णसंपदम् ।
एकदिक्पालनादिन्द्रस्त्वत्तो राय निकृष्यते ॥१४२॥

सहेतुव्यतिरेकालंकारः ।

उक्तव्यतिरेकालंकारपञ्चकं शब्दोपात्तसादृश्यम्। बालातपः प्रतापश्च धरतो भेदमीदृशम्। बालातपो भानुवर्ती प्रतापस्त्वयि वर्तते। रक्तत्वधर्मेण प्रतीयमानसादृश्ययोर्बालातपप्रतापयोर्भेदकथनात्प्रतीयमानसादृश्यभेदमात्रव्यतिरेकालंकारः ।

सकलङ्को निराधारः कलाहीनश्च चन्द्रमाः ।
श्रीरायबङ्गभूमीश त्वत्समः कथमुच्यते ॥१४३॥

जगदानन्दजनकत्वजगत्संतापहारित्वादिधर्मेण प्रतीयमानसादृश्ययोश्चन्द्ररायबङ्गयोर्मध्ये रायबङ्गस्याधिक्योपेतभेदकथनादाधिक्योपेतभेदलक्षणव्यतिरेकालंकारः ।

कादम्बरायो मारश्च रूपवन्तौ मनोहरौ ।
रायः सिंहध्वजो मारो मीनकेतुर्विराजते ॥१४४॥

२. आक्षेपालङ्कारः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दोपात्तसादृश्ययोः श्रीरायमारयोः सदृशध्वजद्वयस्य भेदगमकत्वात्सदृशव्यतिरेकालंकारः ।

राय: कादम्बनाथोऽयं नारीलोलदृगीक्षितः ।
कुसुमास्त्रधरो भाति रतिदेवीदृगंकितः ॥१४५॥

प्रतीयमानसादृश्ययोर्माररराययोः सदृशरतिलोचननारीलोचनानां भेदगमकत्वादपरः सदृशव्यतिरेकालंकारः ।

सुरराजश्रियो रम्यं भोगीन्द्रसुखलालितम् ।
रायस्य राज्यं क्रमते प्रजापालनभासुरम् ॥१४६॥

रायराज्यं प्रजापालनभासुरत्वेन राज्यजातेस्तुल्यं सुरेन्द्रविभूतिभोगीन्द्रसुखलालितत्वेन भिन्नमिति सजातिव्यतिरेकालंकारः ।

प्रकृतं कारणं त्यक्त्वा यत्र हेत्वन्तरं मतम् ।
विभाव्यते स्वभावो वा यत्र सा हि विभावना ॥१४७॥

[2]अचन्द्रा चन्द्रिका कीर्तिः प्रतापो भानुना विना ।
बालातपो मुखं चन्द्रो क्षीराब्धेस्ते नृसिंह भो ॥१४८॥

चन्द्रादिकारणं परित्यज्य कीर्तिचन्द्रिकादेः श्रीरायनामकारणान्तरकल्पनात्कारणान्तरकल्पनाविभावना ।

अकारणमहाबन्धुरकारणसहृद्भवान् ।
अकारणदयालुश्च जनानां रायभूपते ॥१४९॥

अकारणपदेन हेतुं निराकृत्य स्वभावेन बन्धुत्वादिकथनात्स्वभावविभावना ।

प्रतिषेधस्य कथनं प्रतीतिर्वा प्रजायते ।
स यत्राक्षेप इत्युक्तस्त्रिधा कालत्रयाश्रयात् ॥१५०॥

---

१. [1]भास्करम् २. आचन्द्रा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रायो रणाङ्गणेऽरीणां जलं प्रविशतां तृणम् ।
दशतां कृतवल्मीकारोहणान्न व्यधाद्वधम् ।।१५१।।

अतीताक्षेपालंकारः ।

कुतो ललाटे तिलकं करोति नृपरायराट् ।
साङ्कमिन्दुं स्वकीयस्य सममिच्छति किं कृती ।।१५२।।

वर्तमानाक्षेपालंकारः ।

सापराधो नृपो रायः कान्ताडम्बरकोपतः ।
भीत्वा रतिगृहं रम्यं सोत्कण्ठोऽपि न यास्यति ।।१५३।।

अनागताक्षेपालंकारः ।

कीर्तिचन्द्रातपे शैत्यं न सत्यं तव रायराट् ।
यदि सत्यं विपक्षाणां संतापयति किं पुनः ।।१५४।।

शैत्यविरोधिना संतापकर्मणा केनचित्पुंसा शैत्यधर्मस्य आक्षिप्तत्वाद्धर्माक्षेपालंकारः ।

रायबङ्गस्य कीर्तिर्वा नेति को वुध्यते भिदाम् ।
दृश्यते शुद्धधावल्यप्रभा जगति नाश्रयः ।।१५५।।

धावल्यप्रभालक्षणं धर्ममाश्रित्य कीर्तिरूपो धर्म्याक्षिप्त इति धर्म्याक्षेपालंकारः ।

रायं कल्पान्तकं युद्धे दृष्ट्वापि [1]रिपवोऽवशाः ।
भयं न यान्ति वल्मीकतृणपानीयसंश्रिताः ।।१५६।।

भीतेः कारणं वधो वल्मीकाद्याश्रितैर्वैरिभिर्निषिद्ध इति कारणाक्षेपालंकारः ।

रायस्यायल्लके ज्योत्स्नाहिमाम्बुमलयानिल- ।
कर्पूरसंगमेऽप्यस्याः शीतभावो न जायते ।।१५७।।

१. रिपदोवदाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्द्रातपादिवस्तुसंगमे कारणे संनिहितेऽपि शैत्यकार्यं न जातमिति कार्याक्षेपालंकारः।

रणे गृहीतो रायेण रिपुवर्गो वदत्यलम्।
वधाभिलाषो यदि ते हन्तव्यो रणभैरवः ॥१५८॥

हन्तव्य इत्यङ्गीकारमुखेनैव काक्वा स्ववधो निषिध्यत इत्यनुज्ञाक्षेपालंकारः।

कलौ काले महादुष्टाँल्लुण्टाकादिकदुर्जनान्।
निराकरोति श्रीरायः प्रभुत्वेनैव राजते ॥१५९॥

आदिपदेनैव दुर्जननिषेधात् प्रभुत्वाक्षेपालंकारः।

स्थितिर्वा ते गतिर्वा ते रमणास्तु ममाकृतिः।
द्रष्टुं न शक्यते पश्चात्तदेतत् सुविचार्यताम् ॥१६०॥

इति वदन्त्या नायिकया सादरं वचनं प्रयुक्तमिति सामर्थ्यादनादरो निषिद्ध इति अनादराक्षेपालंकारः।

पश्य पश्यसि चेदन्यामस्तु तद्दर्शनं शुभम्।
यावदागमनं तावत्तच्चिन्तास्तु मम प्रिय ॥१६१॥

इति वदन्त्या कान्तयाशीर्वचनमुखेन काक्वा कान्तगमनं निषिध्यत इत्याशीर्वचनाक्षेपालंकारः।

दास्यामि हारं गन्तव्यं त्वया तुभ्यं नमो नमः।
अन्यथा वामपादो मे तव बुद्धिं वदिष्यति ॥१६२॥

इति ब्रुवाणयातिरक्तया कान्तया गमनसहायताकरणव्याजेन प्रियप्रयाणं निषिद्धमिति साचिव्याक्षेपालंकारः।

याहि याहि निजेश त्वं मम यत्नस्तथैव भो।
तव प्रयाणे पाथेयं प्रागेव विहितं मया ॥१६३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रियगमनकार्ये यत्नकरणव्याजेन प्रियया निजेशगमनं निषिद्धमिति यत्नाक्षेपालंकारः ।

क्षणालिङ्गनविघ्नाय रोमहर्षाय कुप्यता ।
प्रेम्णा निषिद्धं गमनं तवेश न मया पुनः ॥१६४॥

प्रेमाधीनतया कान्तया निजेशगमनं निषिद्धमिति परवशाक्षेपालंकारः ।

पुनरुज्जीवनोपायं संजीवनमहापदम् ।
दत्त्वा याहि निजेश त्वं कन्दर्पो मां हनिष्यति ॥१६५॥

जीवनोपायदुर्घटत्वनिवेदनव्याजेन निजेशगमनं निषिद्धमित्युपायाक्षेपालंकारः ।

यामीति वचनं नाथ ते मुखान्निर्गतं वरम् ।
याहि वा वस [1]यत्त्वत्तो मम किंचित् फलं न हि ॥१६६॥

अत्यधिकस्नेहया [2]सकोपया सुकान्तया कान्तगमनं निषिद्धमिति रोषाक्षेपालंकारः ।

स्पृष्टं मया न ताम्बूलं न दृष्टं स्वदितं न वा ।
[3]शून्यं तवास्तु नष्टं वा मार्जारो वात्तु मत्प्रिय ॥१६७॥

प्रागनागत्य पुनरागतेन जीवितेशेन सहैवमुक्त्वा कान्तया ताम्बूलस्य सानुक्रोशं दोषोद्भावनं कृतमित्यनुक्रोशाक्षेपालंकारः ।

कलौ काले प्रजा धर्मं नाचरन्ति न चासते ।
न्यायमार्गे अहो कष्ट[4]मनुशोचति हि रायराट् ॥१६८॥

धर्मपालचूडामणिना रायधरणीशेन कलौ प्रजानां धर्माचारव्यावृत्त्यादिकं दृष्ट्वा पश्चात्तापः कृत इत्यनुशयाक्षेपालंकारः ।

---

१. मत्त्वतो २. सकोपयासि कान्तया ३. शून्यास्तत्रास्तु ४. °मनुशोषते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विपक्षतमसां शत्रौ सुहृत्पद्मप्रकाशके ।
रायप्रतापमार्तण्डे सति किं भानुना भुवि ॥१६९॥

साम्यं दर्शयित्वा मुख्यभानुर्निषिद्ध इति श्लिष्टाक्षेपालंकारः ।

किमियं चन्द्रिकाहोस्वित् कीर्तिः किं रायभूभुजः ।
रात्रावह्नि च दृश्यत्वात् कीर्तिरेव न चन्द्रिका ॥१७०॥

सदादृश्यत्वधर्मेण चन्द्रिका निषिध्यते इति संशयाक्षेपालंकारः ।

कृत्वापि दानं जगतो न तृप्यति हि रायराट् ।
इष्टं दत्त्वापि भुवने न तृप्यति सुरद्रुमः ॥१७१॥

अर्थान्तराक्षेपालंकारः ।

कादम्बराय कीर्तिस्ते कविराजैर्न वर्ण्यते ।
वाचामगोचरत्वात्तां दृष्ट्वा नन्दन्ति मानसे ॥१७२॥

हेत्वाक्षेपालंकारः ।

कादम्बक्षितिपस्य तीर्थममले गौरीशगौरं हृदि
श्रीनाथामरनाथ कर्ण नृपते पुष्पायुध क्ष्मापते ।
भोगीन्द्रार्जुन धर्मराजनृपते भानो सुधांशो गुरो
वार्धे मेरुगिरीन्द्र चन्दनतरो भूमौ नभो मा कुरु ॥१७३॥

गर्वरूपधर्मनिषेधाद् धर्माक्षेपालंकारः । भावचमत्कारसंभवात् पुनरप्युक्तः ।

अन्ये विकल्पा द्रष्टव्या आक्षेपाणां विचक्षणैः ।
मया शास्त्रानुसारेण दिग्मात्रं संप्रदर्शितम् ॥१७४॥

[1]मनोवद् वक्तुरिष्टस्योत्कर्षं वक्तुं निरूप्यते ।
यत्रासंभवि सा सद्भिरुच्यतेऽतिशयाभिधा ॥१७५॥

---

१. मनो वक्तुमिष्ट° ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तव कीर्तिमहालता जगत्सुरभूजाग्रगता स्तुतादिकैः ।
अवलम्बपदं विलोकते यवनस्तुत्यनृसिंहभूपते ॥१७६॥

कीर्तेरुत्कर्षकथनार्थमसंभविलोकाग्रगमनं लोकमतिक्रम्य गमनेच्छया विलोकनं च कथितमित्यतिशयोक्तिः ।

किमास्यं शारदं चन्द्रबिम्बं किं हसनं तव ।
किं किं ज्योत्स्नेति रायस्य संदेहो जायते नृणाम् ॥१७७॥

आस्यहसनयोरुत्कर्षकथनाय वदनचन्द्रयोर्हसनचन्द्रिकयोर्भेत्तुं शक्यत्वेऽपि संशयपूर्वको विवेचनाभावो संभवी कथित इति संशयातिशयोक्तिः ।

रणभेरीरवं श्रुत्वा रायस्य जयशंसिनम् ।
जयं निश्चित्य दिक्कन्या गायन्ति जयकामिनीम् ॥१७८॥

निश्चयातिशयोक्तिः ।

महाकवीनां विस्तीर्णं हृदयं जगदद्भुतम् ।
लोकातिवर्तिसत्कीर्तिविक्रमादरतां गतम् ॥१७९॥

अद्भुतातिशयोक्तिर्विरोधातिशयोक्तिर्वा ।

आकारेणेङ्गितेनापि सूक्ष्मत्वाल्लक्ष्यते यदा ।
तदार्थो यत्र संप्रोक्तः सूक्ष्म इत्याख्यया बुधैः ॥१८०॥

सुरतसदननार्या रायबङ्गोऽनुयुक्तः
क्व गत इति तदासौ भीतिमान् पृष्ठतोऽगात् ।
निजपतिहृदयं साकारभेदेन बुद्ध्वा
वस वस वस तत्रैवेति वाचं ब्रवीति ॥१८१॥

प्रियया प्रियेण कृतो नायिकान्तरसंगमः प्रियस्य पृष्ठगमनाकारेण सभयेन सूक्ष्मं ज्ञात इति सूक्ष्मालंकारः ।

---

१. °रीत्या°

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्र प्ररूपितं वस्तु स्वसमानस्य वस्तुनः।
विदधाति प्रतीतिं सा समासोक्तिः सतां मता ॥१८२॥

भो भो कल्पतरो त्वमत्र भुवने पुष्णासि सर्वान् जना-
नाकल्पं तव कीर्तिवस्तु विदुषां स्तुत्यं परं तिष्ठतु।
काकोलूकपरेण निम्बतरुणानेनालमन्ये च ये
वृक्षाः सन्ति बहुत्वधर्मसहितास्ते सन्तु मा सन्तु वा ॥१८३॥

अत्र कथितः कल्पतरुः स्वसदृशं रायबङ्गं ज्ञापयति, निम्बतरुः स्वसमानं नीतिशून्यनृपं, परे च तरवः स्वसदृशभूपबाहुल्यं सूचयन्ति तत्तद्विशेषणमुक्तानुक्तयोः सममिति समानविशेषणभिन्नविशेष्य-समासोक्तिः।

संतापहारी चन्द्रोऽयं कलामृतविराजितः।
अकलङ्कः सदोद्भासी मया पुण्येन लभ्यते ॥१८४॥

अत्र कथितश्चन्द्रः स्वसमं रायबङ्गं गमयति, संतापहरणं कलामृत-विराजनं चन्द्रे राये च समम्, अकलङ्कत्वं सदाभासनं रायनृपे न चन्द्र इति भिन्नाभिन्नविशेषणसमासोक्तिः।

सनिमेषः सुराधीशो निष्कलङ्कः सुधाकरः।
वदन्कल्पतरुर्लब्धः केनचिद्बहुपुण्यतः ॥१८५॥

अत्र रायनृपसमानानामिन्द्रादीनां निर्निमेषत्वादिधर्मं निराकृत्य सनि-मेषत्वाद्यपूर्वधर्मं निरूप्य रायबङ्गप्रतीतिसमर्थनादपूर्वसमासोक्तिः। अस्यालंकारस्य अन्यापदेश इति नामान्तरं वक्तव्यम्।

अर्थस्य गोपनं वाचा चेष्टया वा प्रकाशनम्।
लेशतो लव इत्युक्तः सद्भिर्निन्दास्तुतिः परैः ॥१८६॥

पूर्वाद्रिं गतबालभानुमधुना तेजस्विनं वीक्ष्य तं
पञ्चास्यासनयातबङ्गनृपतौ कोपं प्रयाते सति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शैलाग्रे स्थितवानहं तव गुणं तेजोऽभिधानं तपो
लब्धुं वै विदधामि चारुवचसा[१]प्रासादयत्तं नृपम् ॥१८७॥

वचोगोपनलेशालंकारः । निन्दास्तुतिर्वा ।

सेवार्थमागतमहाधरणीश्वराणा-
मालोकनेन करुणास्मितभाजनेन ।
सिंहासने स्थितवता नृपकुञ्जरेण
चेतःप्रसत्तिरमला प्रकटीकृताभूत् ॥१८८॥

चेष्टाप्रकाशनलेशालंकारः ।

उक्तानां यत्र वाच्यानां योगो वाच्यान्तरैः सह ।
क्रमेण कथितः सोऽत्र क्रमालंकार उच्यते ॥१८९॥

रूपं वचोऽधररसं स्तनकुम्भयुग्मं
निःश्वासगन्धविषयं तरुणीतनुस्थम् ।
आलोकनश्रवणपानसमागमोरु-
घ्राणक्रियाभिरनुभूय सुखी नृपोऽभूत् ॥१९०॥

क्रमालंकारः ।

भ्रूलोचनकटाक्षान् वै रायस्यालोक्य कामिनी ।
चापभृङ्गशरान्मत्वा जायते भयविह्वला ॥१९१॥

अयमपि क्रमः ।

बुद्धेर्महत्त्वं भूतेर्वा तन्यते यत्र कोविदैः ।
उदात्तं तमलंकारं वदन्ति कविपुङ्गवाः ॥१९२॥

काले कलौ स्वहितमङ्गलचारुबुद्ध्या
पाति प्रजाः करुणया न बिभेति शत्रोः ।
शीतांशुभानुसमनीतिपराक्रमाभ्यां
जेजीयतेऽरिनृपतीभघटामृगेशः ॥१९३॥

---

१. प्रच्छन्नवांस्तां कृदं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बुद्धिमहत्त्वोदात्तालंकारः ।

आस्थानमण्डपगते सुरशैलतुङ्गे
सिंहासने मदनरूपनृसिंहबङ्गः ।
आस्ते सतां फणिपतिर्वरसार्वभौमो
गीर्वाणराज इति वाखिलमन्यमानः ॥१९४॥

ऐश्वर्यमहत्त्वोदात्तालंकारः ।

सत्यरूपमपह्नुत्य यत्रान्यार्थो निरूप्यते ।
अपह्नवमलंकारं तमाहुः काव्यकोविदाः ॥१९५॥
अयं श्रीरायबङ्गो न क्षीरवाराशिरेव वै ।
अन्यथा वरगाम्भीर्यगुणशाली कथं भवेत् ॥१९६॥

रायबङ्गत्वलक्षणं स्वरूपमपह्नुत्य क्षीराम्बुधित्वस्य पररूपस्य निरूपणात् स्वरूपापह्नवालंकारः ।

अयं श्रीरायबङ्गो न समुद्रनवनीतकः ।
[1]कादम्बक्षीरवारशिरुत्पत्तिर्घटते कथम् ॥१९७॥

अयमपि पूर्व एव ।

अयं श्रीरायबङ्गो न सुरभूजोऽन्यथा कथम् ।
समस्तजनसंकल्पदायको जाघटीत्ययम् ॥१९८॥

अयमपि तथैव ।

युद्धरङ्गत्रिनेत्रोऽयं रायबङ्गमहीपतिः ।
कल्पान्तसमवर्त्येव किलान्यत्र दयानिधिः ॥१९९॥

दयानिधित्वं परेष्वभ्युपगम्य स्वेषु रिपुवर्गेण तस्य प्रलयान्तकत्वदर्शनाद्विषयापह्नवालंकारः ।

उपमालंकृतौ पूर्वमुपमापह्नवः स्मृतः ।
अन्यापह्नुतिभेदानां विस्तरो लक्ष्यतां बुधैः ॥२००॥

---

१. कादम्बक्षीरवाराशो उत्पत्ति° ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्र प्रियतरा वाणी प्रेमाधिक्यप्रकाशिनी ।
निरूप्यतेऽसौ विद्वद्भिः प्रेयोऽलंकार उच्यते ॥२०१॥
तरुणि चरणघातो मल्लिकापुष्पसङ्ग-
स्तव घनकुचघातः कौमुदीस्पर्शकल्पः ।
सरसमधुरकाञ्ची दामबन्धः प्रबन्धो
वदति सुरतकेल्यां रायबङ्गक्षितीन्द्रः ॥२०२॥

प्रेयोऽलंकारः ।

उक्तार्थानां विरुद्धत्वं यत्र वाक्ये परस्परम् ।
शब्दार्थविहितं नास्ति तत्त्वतः स विरोधकः ॥२०३॥
कलाधरो न शीतांशुस्तेजस्व्यपि न भास्करः ।
अभीष्टदो न मन्दारो रायबङ्गो गुणाम्बुधिः ॥२०४॥

शब्दकृतविरोधः ।

उत्तुङ्गोऽपि न मेरुर्न तापहृच्चन्दनद्रुमः ।
श्रीमानपि न गोविन्दः कादम्बाम्बुधिचन्द्रमाः ॥२०५॥

अयमपि शब्दकृत एव ।

दयालुना पुण्यजनेन चापि देवेन सुज्ञातगुणेन तेन ।
श्रीरायबङ्गप्रभुणा विपक्षा जिताःसुलोकाःपरिपालिताश्च
॥२०६॥

अयमपि तथैव ।

श्रीरायक्षितिनाथ येन समये प्रस्थानभेरी महा-
कोणेन प्रहता जना रिपुहरे भीत्वाध्वनन्त्यद्भुतम् ।
लोकेषु ध्वनिमत्सु तेषु धरणीभृद्भिस्तयो दिग्गज-
व्रातस्य श्रुतयो विमानततयो भिन्ना वितीर्णा भृशम् ॥२०७॥

अयमर्थकृतविरोधालंकारः ।

शृङ्गारादिरसानां तु नवानां यत्र कथ्यते ।
रूपोत्कर्षं पृथक्सोऽप्यलंकारो रसवान् भवेत् ॥२०८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरुण्या देहलावण्ये स्नात्वा स्नात्वा प्रमोदते ।
अधरामलपीयूषं पीत्वा पीत्वामरायते ॥२०९॥

शृङ्गाराख्यरसवदलंकारः ।

रणसद्मनि शत्रूणां वर्गं दत्त्वा बलिं धराम् ।
सागरान्तां विजित्यायं रायशूरो विराजते ॥२१०॥

युद्धवीररसाख्यरसवदलंकारः ।

कृत्वा तृप्तं जगत्सर्वं सुरागं विपिनद्रुमम् ।
कृत्वा दानेन महता पात्रं नास्तीति मन्यते ॥२११॥

रायबङ्ग इति कर्तुरध्याहारः । दानवीररसाख्यरसवदलंकारः ।

दृष्ट्वा शान्तिजिनं नत्वा स्तुत्वा स्मृत्वा समर्च्य च ।
आनन्दक्षीरवार्राशौ रायबङ्गो निमज्जति ॥२१२॥

धर्मवीररसाख्यरसवदलंकारः ।

आयल्लकानलो दग्ध्वा तन्वङ्गीं पीडयत्यहो ।
इति दूतीवचः श्रुत्वा करुणाब्धौ निमज्जति ॥२१३॥

राय इति कर्ता । करुणाख्यरसवदलंकारः ।

मक्षिकाजालपूयार्द्रव्रणकोटियुतान् रिपून् ।
भिक्षार्थमागतान् दृष्ट्वा जनो वमति राय ते ॥२१४॥

बीभत्साख्यरसवदलंकारः ।

पश्चाद्गतेशबिम्बं सालोक्य चुम्बति दर्पणे ।
मत्वा निजेशं श्रीरायं दृष्ट्वा हसति कौतुकात् ॥२१५॥

हास्याख्यरसवदलंकारः ।

रायारामस्थितान् वृक्षान् स्वनन्दनगतान् बहून् ।
दृष्ट्वावचिनुते पुष्पाण्यमरेन्द्रो विलासतु ॥२१६॥

अद्भुताख्यरसवदलंकारः ।

रायस्य दोर्बलं स्मृत्वा रिपुवर्गो गुहास्थितः ।
भीतो गच्छामि कुत्रेति भयज्वरगतो मृतः ॥२१७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भयानकाख्यरसवदलंकारः ।

कादम्बरायभूपस्य क्रोधाग्नौ विक्रमार्चिषि ।
दग्धवैरीन्धने लोकं व्याप्ते शुष्यन्ति वार्धयः ॥२१८॥

रौद्राख्यरसवदलंकारः ।

देवसेवनकालेऽस्य रायबङ्गस्य चेतसि ।
शीते शान्तरसे व्याप्ते शीतिभूतं जगत्त्रयम् ॥२१९॥

शान्तरसाख्यरसवदलंकारः ।

रसवत्त्वं गिरां लोके रसैर्नवभिरुच्यते ।
रसैरष्टभि[1]रित्येके शान्तवर्ज्यैर्वदन्त्यलम् ॥२२०॥
उत्कर्षो यत्र गर्वस्य कथ्यते मानशालिनाम् ।
तमलंकारमूर्जस्विनामानं मन्यते बुधः ॥२२१॥
पीतं वारिधिसप्तकं जगदिदं हस्तेन संचारितं
भोगीन्द्रस्य किरीटवर्तिमणयः शीर्णीकृताः पर्वताः ।
संचूर्णा विहिता मयेति कदने यो वक्ति गर्वं निजं
तं जित्वा नृपकुञ्जरो विजयते कादम्बवंशोत्तमः ॥२२२॥

ऊर्जस्व्यलंकारः ।

यत्राप्रस्तुतवस्तूनां वर्णना क्रियते जनैः ।
निर्विण्णमानसैस्तच्चाप्रस्तुताशंसनं विदुः ॥२२३॥
हरिततृण[2]भक्षिणोऽमी हरिणा हर्षैर्वसन्ति पीतजलाः ।
इति वक्ति रायवङ्गक्षितिपतिशत्रुव्रजो [3]वने सोऽयम् ॥२२४॥

रायनृपतिना तिरस्कृतत्वान्निर्विण्णमानसेन शत्रुवर्गेण हरिणानामप्रस्तुतानां प्रशंसा कृता यस्मात्तस्मादप्रस्तुतप्रशंसालंकारः ।

---

१. रित्येते । २. भक्षिणो मि हरिणा हर्षैर्वसन्ति सीतजलाः ।
३. वनसोयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशोऽयं स्वर्गभूमिर्नृपसदनमिदं देवराजस्य गेहं
कान्तेयं कामभार्या मदभरितगजो दिग्गजः सार्वभौमः।
अश्वोऽयं शक्रसप्तिः सुरतरुरमलो जैनधर्मो जिनेन्द्रो
देवोऽयं रायबङ्गक्षितिपतिरधुना दिव्यपुण्यो विभाति ॥२२५॥

येन केनचित् कारणेन निर्विण्णचित्तः कश्चित् पुमानस्य नृपस्य विभूतिं धृत्वा वर्णयति तस्मादियमपि अप्रस्तुतप्रशंसा।

यत्र वैकल्यकथनं गुणादीनां विधीयते।
विशेषदर्शनार्थं सा विशेषोक्तिर्निरूप्यते ॥२२६॥

न शीतोऽपि यशोराशिर्जगत्तापं हरत्यसौ।
नोष्णोऽपि विक्रमः शत्रून् रायस्य दहति ध्रुवम् ॥२२७॥

शैत्यगुणवैकल्येऽपि जगत्तापहरणविशेषः। उष्णतागुणविकलत्वेऽपि वैरिदहनविशेषो यतस्ततो गुणवैकल्यविशेषोक्तिः।

न कोकिला न वीणा वा न कीरा न च किन्नरी।
कान्ता तथापि रायस्य चेतो हरति गानतः ॥२२८॥

कोकिलादिजातिवैकल्येऽपि कान्ता स्वरेण रायचेतोहारिणी यतस्ततो जातिवैकल्यविशेषोक्तिः।

न कुप्यति न बध्नाति काञ्च्या कर्णोत्पलेन सा।
न ताडयति रायेन्द्रं भयं नयति कामिनी ॥२२९॥

कोपनादिक्रियावैकल्येऽपि भयप्रापणमिति क्रियावैकल्यविशेषकथनम्।

सरससुरतयुद्धे विक्रमो नास्ति यस्याः
परमनिशितशस्त्रं नास्ति खेटादिकं च।
मदनतुमुलयुद्धाधीशकादम्बनाथं
जयति सरसविद्या सा सती चित्रमेतत् ॥२३०॥

शस्त्रखेटादिद्रव्यवैकल्येऽपि जयति विशेषकथनमिति द्रव्यवैकल्यविशेषोक्तिः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न सन्मित्रं न सत्संगो न सम्यग्धर्मदेशना।
तथापि पुण्यवान् रायो वसत्यानन्दसागरे ॥२३१॥

सन्मित्रादिसुखकारणवैकल्येऽपि पुण्यवानिति हेतुगर्भितविशेषणाद्धेतु-विशेषोक्तिः।

अन्येऽपि भेदाः सन्त्येव विशेषोक्तेर्विदांवरैः।
अभ्यूह्याः शास्त्रमार्गेण विस्तरो न मयोच्यते ॥२३२॥
यत्र किंचित्समीकर्तुं युज्यते केनचित् क्रिया।
एककाला समासो हि तुल्ययोगाभिधो भवेत् ॥२३३॥
स्तवनं निन्दनं चापि समाश्रित्य द्विभेदभाक्।
अलंकारस्तुल्ययोगः कथ्यते विदुषां वरैः ॥२३४॥
भरतस्सगरश्चक्री श्रेणिको बङ्गभूपतिः।
श्रोतृमुख्यपदं प्राप्ता भवन्ति भुवनत्रये ॥२३५॥

स्तुतिपरतुल्ययोगितालंकारः।

चिन्तामणिः कामधेनू रायबङ्गः सुरद्रुमः।
परोपकारे निरता इति रूढिर्जगत्त्रये ॥२३६॥

अयमपि पूर्व एव।

रायबङ्गक्षितीशस्य शत्रुजातश्रियः क्षणम्।
सुरचापश्रियो विद्युन्मालालक्षा न चासते ॥२३७॥

निन्दापरतुल्ययोगितालंकारः।

यत्र प्ररूप्यमाणेन वस्तुना तत्परत्वतः।
इष्टार्थो गम्यते तद्धिपर्यायोक्तं सतां मतम् ॥२३८॥
अस्मद्वैरिपुरं त्वया बलपते श्रीमद्विधेयं भृशं
[1]कादम्बाम्बुधिचन्दिरे निगदतीत्येवं बलाधीश्वरः।

---

१. कादम्बाम्बुनि चन्दिरे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानावज्रभुजङ्गकाञ्चनशिवामन्दारराजामरी—
स्त्रीबिम्बार्कमयं ह्यदान्मदनकान्तावासमप्यद्भुतम् ॥२३९॥

पर्यायोक्तालंकारः।

गुणानां कर्मणां यत्र सहभावः प्ररूप्यते।
सहोक्तिनामकं प्राहुस्तमलंकारमुत्तमाः ॥२४०॥
रायस्य कीर्त्या धवलः शत्रुकान्ताजनः सह।
[1]विक्रमेणारुणं सार्धं तत्कान्ताजनलोचनम् ॥२४१॥

गुणसहभावकथनसहोक्तिः।

श्रीरायक्षितिनाथ विक्रमगुणे नामा सदा वर्धते
वीरश्रीशरदभ्रकीर्तिवनिता त्यागेन साकं तव।
लक्ष्मीः पुण्यपदेन साकममलज्ञानेन वाणी समं
कोशेनाहवदक्षदण्डनिकरः संग्रामरङ्गोद्धुर ॥२४२॥

क्रियासहभावकथनसहोक्तिः। अथवा

कार्यकारणयोर्यत्र वक्तुं युगपदुद्भवः।
कार्योत्पादनसामर्थ्यं तां सहोक्तिं प्रचक्षते ॥२४३॥
पुण्येन सार्धमाधत्ते धर्मं यानेन दिग्जयम्।
त्यागेन कीर्तिं शौर्येण वीरलक्ष्मीं च रायराट् ॥२४४॥

कार्यकारणसहजन्मकथनसहोक्तिः।

यत्राधत्ते पुनर्दत्त्वा किंचित्किंचित् समं न वा।
तामाहुर्निपुणा लोके परिवृत्तिमलंक्रियाम् ॥२४५॥
सुरलोके पुरीं दत्त्वा [2]रिपुभ्यः स्त्रीविराजिताम्।
नरलोके पुरीं हृत्वा तादृशीं भाति रायराट् ॥२४६॥

सदृशार्थपरिवृत्तिः।

---

१. विक्रमेणारुणं सार्द्धं·······जनलोचनम् २. रिहभ्यः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञानं स्वीकुरु बङ्गराज विनयं दत्त्वा गुरुभ्यः सदा
पुण्यं स्वीकुरु देयवस्तुनिकरं दत्त्वा गुरुभ्यः सदा।
वैरिभ्यः सुरलोकसौख्यपदवीं दत्त्वा तदीयं महा—
देशं स्वीकुरु युद्धरङ्गरमणीप्राणेश भूमीश भोः ॥२४७॥

विसदृशार्थपरिवृत्तिः।

कार्यमारभमाणेन दैवात्तत्साधनागमः।
लभ्यते यत्र तत्प्राहुरलंकारं समाहितम् ॥२४८॥

कोपं निवारयितुमिष्टनिजाङ्गनायाः
प्रारब्धवान् नृपतिकुञ्जरबङ्गनाथः।
तावत् सुधांशुरुदयाद्रिमुपैति पूर्णो
रोरौति कोकिलगणो भगणश्चकास्ति ॥२४९॥

एकवाक्यमनेकार्थं यत्र श्लिष्टं तदुच्यते।
अभिन्नपदमुद्दिष्टं श्लिष्टं भिन्नपदं द्विधा ॥२५०॥

[१]देवोऽयमम्बरोद्भासी लोकाह्लादः कविस्तुतः।
मरुत्सहायो राजाग्रे भासते भुवनोत्तमः ॥२५१॥

अभिन्नपदश्लिष्टम्।

सदैव बलसंपन्नो न दीनो जडसंग्रहः।
कविरम्यो रायबङ्गो राजते मन्दरागतः ॥२५२॥

भिन्नपदश्लिष्टम्।

व्यतिरेकाद्यलंकारे श्लेषाः प्राग् दर्शिताः परे।
अन्ये केचन दृश्यन्ते श्लेषास्तत्कथनं यथा ॥२५३॥

आह्लादयन्ति[२]रायं च सानुरागाः प्रजाः प्रजाः।
[३]साकूतं रक्षिता वृद्धाः करमार्दवलालिताः ॥२५४॥

---

१. देवोऽयमम्बरोद्भासि लोकाह्लादी कविस्तुतः २. रायस्य
३. आकूतं।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रजाः जनाः प्रजाः पुत्राः आह्लादयन्तीति क्रियैका अभिन्नश्लेषः ।

रायबङ्गे न दृश्यन्ते श्लिष्यन्ते च पयोधराः ।
उत्तुङ्गा अम्बराधारा मुक्ताफलविभूषिताः ॥२५५॥

अविरुद्धक्रियाश्लेषः ।

वियोगं प्राप्य रायेन्द्रो मोदते हृदये परम् ।
नारीजनस्तु क्लिश्नाति पयोधरसहायकः ॥२५६॥

बिरुद्धक्रियाश्लेषः ।

श्रीरायराज्ये काठिन्यं तरुणीस्तनमण्डले ।
अपवादो निरोष्ठ्येषु काव्येषु न परत्र च ॥२५७॥

सनियमश्लेषः ।

मन्दानिला लुण्टयन्ति दिव्योद्यानेषु सौरभम् ।
अथवा चञ्चरीकाश्च चोरयन्ति हि लोलुपाः ॥२५८॥

नियमनिषेधश्लेषः ।

रायबङ्गः समुद्रश्च भूभृदास्पदगौरवः ।
गम्भीरो भूरिरत्नाढ्यो लावण्याढ्यो विराजते ॥२५९॥

अविरुद्धश्लेषः ।

पयोधरविलोलोऽयं नृसिंहश्चातकायते ।
सन्मानसगतो बङ्गो राजहंसायते सदा ॥२६०॥

उपमाश्लेषः ।

अर्थयोर्यत्र समयोरन्वयः क्रिययाजनि ।
तन्निदर्शनमित्युक्तं सदसल्लक्ष्मगोचरम् ॥२६१॥

सुजनसुरकुजोऽयं रायबङ्गक्षितीशो
वितरति फलमिष्टं सर्वलोकाय लोके ।
गगनतलनिवासी कौमुदीकामिनीशो
विलसदमृतदीप्तिः किं न लोकाय धत्ते ॥२६२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रशस्तनिदर्शनालंकारः ।

अन्याय इति शब्दं च न वादयति बङ्गराट् ।
अपशब्दं स्वशिष्यौघं न वादयति शाब्दिकः ॥२६३॥

अप्रशस्तनिदर्शनालंकारः ।

निन्दाव्याजेन यत्रार्थं स्तौति कंचिच्च सा मता ।
व्याजस्तुतिर्गुणा एव दोषा इव चकासते ॥२६४॥
वक्षोरङ्गे महाश्रीर्वरमुखकमले शारदा वीरलक्ष्मी–
दोर्दण्डे रायबङ्गक्षितिप तव महाशासनाद्वर्ततेऽसौ ।
आज्ञामुल्लङ्घ्य लोके तव विशदयशस्कामिनी बम्भ्रमीति
राज्ये सेयं तवाज्ञा सुकविजननुता तत्कथं जाघटीति ॥२६५॥

व्याजस्तुत्यलंकारः ।

देवतांघ्रिपसंस्तुत्या कीर्तिः संशोभते कथम् ।
सागरान्ता धरा कान्ता कथं जीवति राय ते ॥२६६॥

श्लिष्टव्याजस्तुतिः ।

व्याजस्तुतिविशेषाणामपर्यन्तः प्रविस्तरः ।
बुद्धिशालिभिरभ्युह्यस्तस्मान्नास्माभिरुच्यते ॥२६७॥
[1]इष्टानां यत्र वस्तूनामाशंसनमिदं मतम् ( ? °मिदंच यत्) ।
तामाशिषमलंकारं वदन्ति कविकुञ्जराः ॥२६८॥
सुरेन्द्रपूज्यः परिपूर्णसौख्यः
सुज्ञानसाम्राज्यमहापदस्थः ।
जिनेन्द्रचन्द्रो वरदानरुद्रः
श्रीबङ्गराजस्य मुदेऽस्तु देवः ॥२६९॥

आशीरलंकारः ।

---

१. अष्टानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरेन्द्रकन्या परिपूर्णरूपा
श्रृङ्गारदुग्धाम्बुधिकौमुदी सा।
तुङ्गस्तनी मङ्गलहारभूषा
श्रीबङ्गराजस्य मुदेऽस्तु कान्ता ॥२७०॥

इयमप्याशीः।

यत्रानेकपदार्थानामत्युत्कृष्टेतरात्मनाम्।
एकत्र कथनं जातं स समुच्चय उच्यते ॥२७१॥
[१]श्रीशान्तिनाथदेवोऽयं स्याद्वादोऽमोघलाञ्छनो
धर्मश्रीरायबङ्गोऽत्र लोके रत्नानि त्रीणि वै।
कादम्बवार्धिचन्द्रो लक्ष्मीः कीर्त्यङ्गना गिरां देवी
जयकामिनी च पूज्या चत्वारि हि दिव्यवस्तूनि ॥२७२॥

अत्युत्कृष्टसमुच्चयालंकारः।

रायबङ्गक्षितीशस्य सन्ति शत्रुपुरेष्वमी।
जम्बुका घूकभल्लूकाः तिन्दुका युगपत्रकाः ॥२७३॥

अत्यपकृष्टसमुच्चयः।

यत्र [२]कोऽपि जनो वक्ति प्रीतियुक्तमिवाप्रियम्।
अलंकृतिं तां वक्रोक्तिं प्राहुः काव्यविशारदाः ॥२७४॥
श्रीबङ्गेश्वर साधु साधु भवतः श्रृङ्गारशोभा परा
मुक्ताजालमलंकृतं परिलसद्वज्रंच संभूषितम्।
श्रीचन्द्राभरणं महोदयकरं सर्वं त्वया संवृतं
वस्त्रेणेति निजालयागतपतिं सा[३] वक्ति कान्ता गिरा ॥२७५॥

वक्रोक्त्यलंकारः।

---

१. श्रीशान्तिनाथ देवः स्याद्वादामोघलाञ्छनो धर्मश्री रायवङ्गभूपो रत्नानि श्रेणि लोकेऽत्र (?)। २. कोपाध्वजो ३. वानक्ति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसिद्धसाधनाद्यत्र कालत्रितयगोचरम् ।
साध्यं निश्चीयते प्राज्ञैरनुमानं तदुच्यते ॥२७६॥
मानसोल्लासनं दृष्टि शीला साधवगम्य सा (?) ।
कान्ता श्रीरायबङ्गस्य [1]शृङ्गाराब्धौ निमज्जति ॥२७७॥

वर्तमानसाध्यगोचरानुमानालंकारः ।

श्रीरायभूपदिव्याङ्गे मुक्ताजालं विलोक्य सा ।
कान्ता कुप्यति बध्नाति काञ्चीदाम्ना निजेश्वरम् ॥२७८॥

अतीतसाध्यगोचरानुमानालंकारः

कादम्बवार्धिचन्द्रस्य वाग्विलासादनागतम् ।
फलं निश्चित्य सा कान्ता निजेशेऽगात् परां मुदम् ॥२७९॥

भाविसाध्यगोचरानुमानालंकारः ।

यत्रासंभाव्यसंबन्धो वस्तुनोऽन्येन केनचित् ।
अनौचित्येन संप्रोक्तो विषमं तं प्रचक्षते ॥२८०॥
कादम्बनाथ करुणारसदुग्धवार्धिः
क्वायं त्वदीयहृदये सकलप्रजासु ।
रुद्रावतार धर धीर रिपुव्रजेषु
क्वायं चकास्ति च रसो वररौद्रनामा ॥२८१॥
उत्कृष्टतान्तरं यत्र प्रकृतस्योपलक्षणम् ।
कथ्यतेऽवसरः सोऽयमलंकारो विबुध्यताम् ॥२८२॥
येन जिष्णुरपि ध्वस्यः शत्रुर्भीमोऽपि सङ्गरे ।
तस्य श्रीरायबङ्गस्य दोर्दण्डेऽभूज्जयाङ्गना ॥२८३॥

अवसरालंकारः ।

यत्र साम्यं प्रतीयेत वस्तुनः प्रतिवस्तुना ।
इवादीनामप्रयोगे प्रतिवस्तूपमा हि सा ॥२८४॥

---

१. शृङ्गारा....निमज्जति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादम्बवंशे विस्तीर्णे स एको रायभूपतिः ।
अब्धौ सकलरत्नानि कौस्तुभाख्यां भजन्तु किम् ॥२८५॥

प्रतिवस्तूपमा । अस्या उपमायामन्तर्भाव इति केचित् ।

यत्सारं निश्चितं यत्र तस्मात्सारं ततोऽपि तत् ।
सारं निश्चीयते व्याप्त्या सा सारालंकृतिर्मता ॥२८६॥

कादम्बाब्धौ सुसारो वरगुणनिलयो रायबङ्गामृतांशु–
स्तस्मिन् सारा विवेकामलतरविलसत्कौमुदी लोकपूज्या ।
तस्यां संतापहृत्त्वं सुकविजननुतं सारमस्मिन् सुसारं
सत्सौख्यापादकत्वं वरविशदयशोदायकत्वं हि तस्मिन् ॥२८७॥

सारालंकारः ।

अन्यस्य वस्तुनोऽन्यस्मिन् साम्याद्वस्तुविनिश्चयः ।
स्वकारणवशाज्जातो यत्र स भ्रान्तिमान् भवेत् ॥२८८॥

संध्यारागं वनाग्निं गिरितटगतधातुव्रजं बालभानुं
कूपाराग्निं नभोऽन्तर्गतदिवि जनधीरक्तनीरेजषण्डम् ।
[1]दृष्ट्वा च बेभीयतेऽसौ सकलरिपुगणै[2]स्त्वत्प्रतापः सुतापो
मत्वेति श्रीविलासास्पदविजयरमानर्तकीनृत्यरङ्ग ॥२८९॥

भ्रान्तिमदलंकारः । मोहोपमेति केचित् ।

एतद्वेदमिदं वेति चलद्बुद्धिस्तु संशयः ।
हेतुना निश्चयो यत्र निश्चयान्तोऽपि सत्कृतः ॥२९०॥
शत्रुक्षयज्ञापकधूमकेतुः किं वैरिचन्द्रस्य विधुंतुदः किम् ।
त्वद्धस्तखड्गं कवयो विलोक्य संशेरते वीर नृसिंहभूप ॥२९१॥

संशयालंकारः ।

किं किं कराब्जनिपतन्मधुपावली भो
वीरश्रियः कविनुतावररोमराजिः ।

---

१. दृष्ट्वा····भीयते २. °स्वप्रतापो सुतापो ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वद्धस्तखड्गमवलोक्य कवीश्वराणां
बुद्धिः स्फुरत्यमलबोधपराक्रमेश ॥२९२॥

अयमपि संशयः ।

चिन्तामणिः किं न जडत्वमस्य
किं वा सुरागो नहि पुष्पजालम् ।
विवेकवाक्प्रौढियुतेन तेन
त्यागेन कादम्ब्रनृपः प्रबुद्धः ॥२९३॥

निश्चयान्तसंशयालंकारः । संशयः संशयोपमा, निश्चयान्तो निर्णयोपमेति केचित् ।

पूर्वपूर्वो विशिष्टोऽर्थो रच्यते तद्विशेषणम् ।
उत्तरोत्तरतन्निष्ठं यत्र सैकावली मता ॥२९४॥
श्रीराय क्षितिपालको वरमहालक्ष्मीपतिः सा रमा
वीरश्रीसहचारिणीजयवधूः कीर्त्यङ्गना भूषिता ।
सा कीर्तिर्वरशारदासहचरी सा शारदामञ्जुल–
श्रीतुण्डाब्जनिवासिनीनुतमुखं संपूर्णसीमोपमम् ॥२९५॥

एकावल्यलंकारः ।

अप्रयुज्यविशेष्यं तद्विशेषणपदानि वै ।
साकूतानि प्रयुज्यन्ते यस्मिन् परिकरः स हि ॥२९६॥
कुवलयकरसारं श्रीचकोरीप्रमोदं
नववररसपीयूषाश्रयं सत्कलेशम् ।
कविदिविजसहायं सर्वलोकप्रियं कं
वदति निजसमानं रायबङ्गप्रवीणः ॥२९७॥

परिकरालंकारः ।

वस्तुसाधारणं यत्र किंचिदेकत्र रूप्यते ।
निषिध्यते तदन्यत्र परिसंख्या हि सा मता ॥२९८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादम्बनाथसाम्राज्ये काठिन्यं करपीडनम् ।
कान्तापयोधरद्वन्द्वे तत्केल्यामेव ताडनम् ॥२९९॥

परिसंख्यालंकारः ।

याचनं चुम्बनादाने बन्धनं दुष्टनायके ।
वियोगः पञ्जरे भीतिः क्रुद्धकान्तावलोकनात् ॥३००॥

इयमपि परिसंख्या । सनियमश्लेष इति केचित् ।

प्रश्नोत्तरद्वयं यत्र व्यक्तं गूढं च वोभयम् ।
उच्येते तमलंकारमाहुः प्रश्नोत्तराह्वयम् ॥३०१॥
प्रजानां पालनं कस्मान्निवृत्तिः पीडनस्य च ।
रायबङ्गमहीपालाद्दयाम्भोनिधिचन्दिरात् ॥३०२॥

व्यक्तप्रश्नोत्तरालंकारः ।

पयोनिधिसमानस्य रायबङ्गमहीपतेः ।
क्रमाब्जभासुरस्याप्यमेयस्य श्रीः क्व वर्तते ॥३०३॥

व्यक्तप्रश्नगूढोत्तरालंकारः । अस्मिन् श्लोके पादचतुष्टयस्य प्रथमाक्षरचतुष्टये गृहीते पराक्रमे इति भवति तदेव गूढोत्तरम् ।

तव संबन्धि निष्काम तव संबोधनं कथम् ।
कीदृशस्त्वं पुनः कीदृग्मानवेश प्रपूजित ॥३०४॥

व्यक्तगूढोत्तरप्रश्नोत्तरालंकारः ।

अलंकृतीनामुक्तानामुपमादिभिदात्मनाम् ।
मध्ये द्वयोस्त्रयाद्रीनां संगो यत्र स संकरः ॥३०५॥
श्रीवङ्गराज वदनं तव पूर्णचन्द्रः
पादद्वयं कमलयुग्ममिव प्रभाति ।
नायं भुजोऽरिनृपवृन्दसुधांशुराहुः
कीर्तिः करोति सकलाम्बुधिलङ्घनं च ॥ ३०६ ॥

संकरालंकारः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकोशमपि नीरेजं सदण्डमपि निर्जितम् ।
रायबङ्गमुखाब्जेन निष्पुण्यस्य तथा भवेत् ॥३०७॥

अयमपि संकरः ।

अलंकृतीनां सर्वासां गुणमुख्यव्यवस्थया ।
समकक्षतया यस्य संकरस्य द्वयी गतिः ॥३०८॥
अलंकृतीनां संगृह्यानन्तविस्तरमप्यमूम् ।
एष मार्गः प्रमाणेन दर्शितोऽस्माभिरुत्तमः ॥३०९॥
नानालंकाररत्ने विशदतररसोदारपिण्डीरडिण्डे
नानाभावोरुरङ्गत्तरलतमरसच्चारुकल्लोलमाले ।
शय्यापाकोरुवृत्तिप्रसरबहुगुणोदात्तरीत्यभ्रजाले
काव्यक्षीराम्बुराशौ जयतु तव महाकीर्तिचन्द्रो नृसिंह ॥३१०॥

इति परमजिनेन्द्रवदनचन्दिरविनिर्गतस्याद्वादचन्द्रिकाचकोरविजयकीर्ति-
मुनीन्द्रचरणाब्जचञ्चरीकविजयवर्णिविरचिते श्रीवीरनरसिंह-
[1]कामिरायबङ्गनरेन्द्रशरदिन्दुसंनिभकीर्तिप्रकाशके शृङ्गारा-
र्णवचन्द्रिकानाम्नि अलंकारसंग्रहे अलंकारनिर्णयो
नाम नवमः परिच्छेदः ।

अलंकारनिर्णयो नाम नवमः परिच्छेदः ।

■

१. काहिराय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# दोषगुणनिर्णयो नाम

## दशमः परिच्छेदः

निर्दोषधर्मः पुण्याय यथा शक्तस्तथा भुवि ।
निर्दोषकाव्यं सत्कीर्त्यै वर्ज्यदोषानतो ब्रुवे ॥१॥

असमर्थं श्रुतिकटु निरर्थकमवाचकम् ।
च्युतसंस्कृत्यप्रयुक्तं ग्राम्यमश्लीलकं परम् ॥२॥

नेयार्थं क्लिष्टसंदिग्धे ततोऽप्यनुचितार्थकम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत्तथा ॥३॥

अप्रतीतमिति प्रोक्ताः पददोषा विशारदैः ।
प्रथमं लक्षणं तेषां कथ्यते क्रमतो मया ॥४॥

अङ्गीकृतार्थं यद्वक्तुं न शक्तं तत्पदं तदा ।
असमर्थमिति प्रोक्तं तदुदाहरणं यथा ॥५॥

ग्रामं भवति चैत्रोऽसौ नगरं हन्ति माधवः ।
दिव्यन्ति साधवो मोक्षं दयतेऽरिं धराधिपः ॥६॥

अत्र भवति–हन्ति–दिव्यन्ति–पदानां गत्यर्थसंभवेऽपि गत्यर्थे सामर्थ्याभावात् पदत्रयसमर्थम् । दयते-पदं हिंसार्थे सामर्थ्याभावादसमर्थम् ।

कठिनाक्षरसंदर्भं पदं श्रुतिकटूदितम् ।
सृष्ट्रा विनिर्मिते वात्र राष्ट्रे भाति पुरं सदा ॥७॥

अत्र सृष्ट्रा राष्ट्रे इति पदद्वयं श्रुतिकटु ।

पादपूरणमात्रार्थं यत् पदं प्रतिपाद्यते ।
तन्निरर्थकमित्युक्तं गुणदोषविशारदैः ॥८॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाति वै नगरं चात्र खलु शक्रपुरोपमम् ।
तदेव तु हि गन्तव्यं त्वया सुखफलार्थिना ॥९॥

अत्र च वै [1]खलु तु हि पदानि स्वार्थानि (न) सन्तीति निरर्थकानि ।

स्वाभिप्रेतं न वक्त्यर्थं प्रयुक्तमपि यत्पदम् ।
तदवाचकमित्युक्तं काव्यसारविचक्षणैः ॥१०॥

रणे जयाङ्गनां चैत्रो भटत्वाल्लभते पराम् ।
शूरत्वादिति हेत्वर्थे भटत्वं पदमीरितम् ॥११॥

अत्र भटसामान्यवाचकं भटपदं शूरवाचकं न भवतीत्यवाचकं ज्ञेयम् ।

शास्त्रोक्तलक्षणं नास्ति यत्र तच्च्युतसंस्कृति ।
भाते विधुर्नभोभागे नगरं तिष्ठते नरः ॥१२॥

अत्र भाते तिष्ठते पदयोरात्मनेपदस्य लक्षणं नास्ति । नगरमित्यधिकरणे द्वितीयाया लक्षणं नास्ति ।

प्रसिद्धमपि यच्छास्त्रे कविभिर्न प्रयुज्यते ।
तदप्रयुक्तं ज्ञातव्यं पदं दुष्टं विशारदैः ॥१३॥

अणिमादिगुणोपेतो दैवतस्तं [2]निरूपयन् ।
कविभिर्दैवतः शब्दः पुल्लिङ्गे न प्रयुज्यते ॥१४॥

यत्पदं नोचितं यत्र तत्र तद्ग्राम्यमुच्यते ।
ग्रामवर्तिजनश्लाघ्यं निपुणैर्निन्द्यते यथा ॥१५॥

अधरं भक्षयित्वासौ तरुण्याः [3]स्तनमण्डलम् ।
हस्तेनावृत्य तद्देहे शेते कश्चिन्नरो मुदा ॥१६॥

अत्र अधरभक्षणं हस्तेन स्तनावरणं कान्ताशरीरशयनं ग्राम्यवचनम् ।

---

१. खलु मही पदाशी स्वार्था न । २. निरूपि सन् । ३. °कुण्डलम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदेन येनासभ्यार्थो ज्ञाप्यते तत्पदं मतम् ।
अश्लीलं त्रिविधं व्रीडामङ्गलार्थजुगुप्सकम् ॥१७॥

तरुण्या मदनावासो राजते सुखदायकः ।
मदनावासशब्दोऽयं लज्जोत्पत्तिविधायकः ॥१८॥

कामिनीवदनं पद्मं विनाशयति लीलया ।
विनाशयति नीरेजमेतत्पदममङ्गलम् ॥१९॥

रतौ तरुण्या नाथस्य क्षुते सति विशङ्क्यते ।
क्षुते सति पदं चैतज्जुगुप्साजन्मकारणम् ॥२०॥

स्वसंकेतितमर्थं यत्पदं मूलार्थसूचने ।
सामर्थ्यरहितं वक्ति तन्नेयार्थं विदुर्बुधाः ॥२१॥

अनन्तरानुजो धर्मपुत्रस्य परिपातु वः ।
रुद्रकान्तेक्षुवाटेषु प्रभाते रोरवित्यलम् ॥२२॥

अत्र धर्मपुत्रस्य अनन्तरानुजः भीमः । भीमो नाम महेश्वरः इति स्वसंकेतः । रुद्रकान्ता शिवा । शिवा नाम जम्बुका इति स्वसंकेतः ।

अर्थं व्यवहितं वक्ति तत्पदं क्लिष्टमुच्यते ।
विनतानन्दनारोहकान्तापुत्रो जयत्यलम् ॥२३॥

विनतानन्दनो गरुडः तदारोहको विष्णुः तत्कान्ता लक्ष्मीः तत्पुत्रो मन्मथः इति व्यवहितार्थद्योतकम् ।

अर्थं विवक्षितं तस्मादन्यार्थमपि यत्पदम् ।
प्रकाशयति संदिग्धं तदुक्तं दोषवेदिभिः ॥२४॥

देवो नभसि यातीति संदिग्धं पदमुच्यते ।
निर्जरो वा घनो वेति संशयस्य समुद्भवात् ॥२५॥

पदस्य यस्यानुचितो गम्यतेऽर्थस्तदुच्यते ।
बुधैरनुचितार्थं हि तस्योदाहरणं यथा ॥२६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरुषो राजते राजसभायां वरधीवरः ।
प्रकाशयत्यनुचितं कैवर्तं धीवरः पदम् ॥२७॥

प्राधान्येन न वर्तेत स्वार्थे यत्पदमीरितम् ।
अविमृष्टविधेयांशं तत्पदं प्रणिगद्यते ॥२८॥

मार्गे याति नरः कश्चिन्महाशूरो धनाधिपः ।
धनाधिपमहाशूरपदे प्राधान्यतो न हि ॥२९॥

सङ्ग्रामदानप्रस्तावे महाशूरधनाधिपपदद्वयेन सार्थपरामर्शस्य प्राधान्येन संभवान्मार्गे तदसंभवात् अविमृष्टविधेयांशत्वम् ।

इष्टार्थादन्यदुष्टार्थप्रतीतिजनकक्षमम् ।
विरुद्धमतिकृच्चोक्तं तत्पदं विदुषां वरैः ॥३०॥

सुरतरवे लोकोऽयं गुरवे तुभ्यं सदा नमति ।
जननी या भवतः सा परोपकारे सदा क्रमते ॥३१॥

'सुरतरवे' 'जननी या भवतः' इति पदद्वयं विरुद्धाऽर्थप्रतीतिकरम् । सुरतरवे सुरत-रवे 'जननी या भवतः' 'जननी याभवतः' ।

स्वकीयशास्त्रसिद्धार्थं यत्पदं वक्ति तत्पदम् ।
अप्रतीतमिति प्रोक्तं कथ्यते तदुदाहृतिः ॥३२॥

त्रैलोक्यं वर्तते जीवसुखदुःखविधायकम् ।
सृष्टिसंहारकरणे बहुधानकमुच्यते ॥३३॥

सांख्यागमे त्रैलोक्यमिति बहुधानकमिति पदद्वयं प्रधानतत्त्ववाचकं तद् आगमप्रसिद्धत्वाद् अप्रतीतम् ।

उक्त्वा पदगतदोषान् पदैकदेशेषु पूर्वकथितास्तान् ।
दोषान् वदामि शृणु भो राय नृपाधीश भो यथायोगम् ॥३४॥

सरसत्वान्मृदुत्वाच्च सुभगत्वाच्च सुन्दरी ।
जगन्मोहकरी चित्रं कामेनापि विलोक्यते ॥३५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र पदैकदेशस्य त्वत्प्रत्ययस्य बाहुल्यात् सरसत्वादिपदत्रयं श्रुतिकटूच्यते ।

आलिङ्ग्य कामुकः सौख्यं प्रमदायाः पयोधरान् ।
यात्योदनं सूपकारः पचतेऽलं [1] धरेशिने ॥३६॥

अत्र पयोधरान् इति एककान्तायाा बहुवचनं पदैकदेशरूपं निरर्थकम् । पचते इत्यात्मनेपदमपि पदैकदेशरूपं निरर्थकं फलेशत्वाभावात् ।

मां समानो न यातीतः साधरामृतसौष्ठवाम् ।
अत्र मांसमृतेत्येतत्पदांशोऽश्लीलमुच्यते ॥३७॥

अत्र मांसेति जुगुप्साकरमश्लीलं मृतेत्यमङ्गलमश्लीलम् ।

देवतया पूज्योऽयं नरनाथो धर्मसाररसशाली ।
देवेति तयेति तथा देवतया वेति भवति संदेहः ॥३८॥

अत्र पदैकदेशरूपं संदिग्धम् ।

त्यागवाः कुर्वते युद्धं गीर्वाणैस्सर्वदा समम् ।
लक्षको दानशब्दस्य त्यागशब्देन वाचकः ॥३९॥

अत्र त्यागवा इति पदैकदेशस्त्यागशब्दः दानशब्दगमको भवति । न पुनरसुरार्थवाचकः ।

पददोषं निरूप्याहं वाक्यदोषं ब्रुवेऽधुना ।
श्रृणु राय महीनाथ काव्यगोष्ठिविशारद ॥४०॥

उपहतलुप्तविसर्गं हतवृत्तं गर्भितं तथाकीर्णम् ।
न्यूनपदं कथितपदं प्रसिद्धिहतमक्रमं विसंधि तथा ॥४१॥

प्रतिकूलवर्णमपदस्थितपदमस्थानगतसमासं च ।
अधिकपदं रसरहितं समाप्तपुनरात्तमनभिहितवाच्यम् ॥४२॥

---

१. दरोशिने ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अप्रस्तुतार्थममतपरार्थमर्धान्तरैकवाचि तथा ।
भग्नप्रक्रममभवन्मतयोगपतत्प्रकर्षयोर्युगलम् ॥४३॥
असकृद्याति विसर्गो यत्रोकारं विलोप्यभावं वा ।
उपहतलुप्तविसर्गं तद्वाक्यं दुष्टमिति वदन्ति बुधाः ॥४४॥
नरो वरो हितोऽर्च्यो वा गम्भीरो दुर्लभो भुवि ।
अवरा अहिता ज्ञानहीना जीवा गृहे गृहे ॥४५॥

असकृद्विसर्गो पूर्वार्धे उकाररूपं याति लोपमपरार्धे ।

यत्र च्छन्दोभङ्गो वर्णानां हीनतादितत्त्वं वा ।
गुरुलघुवर्णस्थाने लघुगुरु तद्वाक्यमेव हतवृत्तम् ॥४६॥
कान्तेन नारीसमाना विदग्धा विलोकितापि प्रमदं न याति ।
स्मरेण कान्ता हरिणनयना निपीड्यतेऽसौ [1]कुसुमोरुबाणैः ॥४७॥

अत्र पूर्वार्धे समानेत्यत्र माकारस्थाने लघुना भवितव्यम् । अपरार्धे हरिणनयनेत्यत्र णकारस्थाने यकारस्थाने च गुरुणा भवितव्यम् । गुरुलघोर्व्यत्ययाद्धतवृत्तम् ।

मृगाङ्ककरा शीता[2] हरन्ति तमसां ततिम् ।
वने चूतकिसलयानि वसन्ते भान्ति सर्वतः ॥४८॥

अत्र पूर्वार्धे प्रथमपादे न्यूनाक्षरत्वं तृतीयपादेऽधिकाक्षरत्वं हतवृत्तं ततः ।

आरामस्यामलदेशे नारी सकलभूरिगुणरम्या ।
संक्रीडय पुनः क्रीडति सरोवरे विदलदखिलकमलाढ्ये ॥४९॥

अत्र प्रथमपादे गणत्रयमतिक्रम्य यतिः छन्दोभङ्गः । द्वितीयपादे नारीति पादमध्ये यतिः छन्दोभङ्गः । ततो हतवृत्तम् ।

---

१. कुसुमोरबाणैः । २. शिता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छन्दःशास्त्रे यतिः प्रोक्तो यादृशस्तादृशस्य वै ।
यतेरभावो विद्वद्भिः छन्दोभङ्गो निरूप्यते ।।५०।।

अन्यवाक्यस्य मध्येऽस्ति यत्रान्यद्वाक्यमीरितम् ।
तद्वाक्यं गर्भितं प्राहुः काव्यालंकारकोविदाः ।।५१।।

शृंगाररसवाराशौ निमग्नाङ्गी विलोकते ।
रमते प्रमदारामे तरुणी निजनायकम् ।।५२।।

अत्र रमते प्रमदारामे इति वाक्यं वाक्यान्तरमध्यगतमिति गर्भितम् ।

बहुवाक्यानां यत्र प्रविशन्ति पदानि मिश्रितानि मिथः ।
तत् संकीर्णं कथितं क्लिष्टं पुनरेकपदवाक्यवृत्तिः ।।५३।।
कुप्यति रमणो नारी नमति रुषं च चरणपङ्कजे त्यजति ।
परिरभ्य मोदतेऽसौ चुम्बति मज्जति वरार्णवे सौख्ये ।।५४।।

अत्र नारी कुप्यति रमणश्चरणपङ्कजे नमति । नारी रुषं त्यजति रमणः परिरभ्य चुम्बति वरासौ मोदते रमणः सौख्येऽर्णवे मज्जतीति बहूनां वाक्यानां पदानि परस्परमिश्रितानि इति संकीर्णम् । एकवाक्यगतपदानि मिथो मिश्रितानि चेत् क्लिष्टं वाक्यं ज्ञेयम् ।

पदेन येन यद्वाक्यं विना न्यूनं भवेद्यदा ।
तदन्यूनपदमित्युक्तं तस्य लक्ष्यं प्ररूप्यते ।।५५।।
रतिक्रियार्थी रमणीं जगन्मोहनरूपिणीम् ।
विलोक्यालिङ्ग्य सौख्याब्धौ निमज्जति मनोहरे ।।५६।।

अत्र नायक इति विशेष्यपदाभावाद् न्यूनपदवाक्यम् ।

पदस्य कथनं यत्र कथितस्य पुनर्यदा ।
तदा सद्भिस्तु कथितपदं तद्वाक्यमुच्यते ।।५७।।

स्मरकेलिविनोदेन कान्ता कान्तस्य ताडनम् ।
करोति केलिनीलाब्जकर्णपूरेण चारुणा ।।५८।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र केलीति प्रागुक्तं पुनरपि केलीति कथितं ततः कथितपदं वाक्यम् ।

प्रसिद्धिरहितं यत्र पदमुक्तं तदुच्यते ।
प्रसिद्धिहतमेतद्धि वाक्यं दुष्टं विचक्षणैः ॥५९॥

पद्माकरे सरोजाक्षी केकां हंसा विकुर्वते ।
तां निशम्य मम स्वान्तं बिभेति मदनातुरम् ॥६०॥

अत्र केकाशब्दो मयूरवाण्यां प्रसिद्धो न हंसध्वनौ इति प्रसिद्धिहतं वाक्यम् ।

लोकशास्त्रक्रमो नास्ति यत्र तद्वाक्यमक्रमम् ।
तदुदाहरणं वक्ष्ये तद्वाक्यप्रतिपत्तये ॥६१॥

उद्यानकैरवाम्भोजवृद्धीनां हेतवो मताः ।
दिवाकरवसन्ताब्जा मोदयन्तु सतां मनः ॥ ६२ ॥

अत्र कमलारामकैरवाणां वृद्धिहेतुत्वे भानुवसन्तचन्द्राणां वाच्ये व्यत्ययकरणादक्रमं वाक्यम् ।

योगसौगतसांख्यानां मते देवाः प्ररूपिताः ।
कपिलेश्वरबुद्धास्तु क्षणिकेतरवादिनः ॥६३॥

अत्र स्पष्टमुदाहरणम् ।

यत्र वाक्ये विरूपत्वं विश्लेषोऽश्लीलता तथा ।
कष्टता संधिदोषाः स्युः विसंधि तदनुस्मृतम् ॥६४॥

वने आस्ते वरा नारी तद्दृष्टी अतिचञ्चले ।
तदूरू अधिकौ भातस्तज्जङ्घे अतिमोहने ॥६५॥

अत्र प्राप्तेऽपि संधौ सकृदविहिते सति, निषिद्धेऽपि संधौ तथैव असकृद्विहिते सति वैरूप्यं दोषः, ततो विसंधि वाक्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईश आगत उदात्तसंपदा भूषितो[1] रमणि पश्य पश्य ते।
एष ऊर्जितगुणस्तवाधुना कामसौख्यममितं करोत्यलम् ॥६६॥

अत्र निषिद्धे सन्धौ तथैवासकृद्विहिते सति विश्लेषो दोषः। ततोऽपि विसन्धि वाक्यम्।

सुभगेशं निजं नारी विलोक्य परिरभ्य चुम्बति प्रमदम्।
अरुणामृत अमृताभं (अधरामृतममृताभं) पायं पायं रसाब्धि-
मग्नाभूत् ॥६७॥

अत्र सुभगेशमिति सुभगमीशं सुष्ठु भगेशमिति व्रीडाकरमश्लीलं संधिकरणं ततोऽपि विसंधि वाक्यम्।

गुर्वालोकनपात्रचार्वमलं पूर्वपूर्वसौन्दर्यम्।
ऊर्वङ्गजगजनिगडं चित्रमिदं भाति कामिनीरूपम् ॥६८॥

अत्र बहुकृत्वः श्लिष्टतया संधेर्दोषः कष्टत्वमुच्यते। ततोऽपि विसंधि वाक्यम्।

रसानुकूलवर्णातिरिक्तं यद्वाक्यमुच्यते।
तदुक्तं प्रतिकूलादिवर्णं काव्यविचक्षणैः ॥६९॥

शठेन दृढमालिङ्ग्य नाथेन कठिनस्तनौ।
कम्बुकण्ठ्या मनःखेदं विभिद्याप्तं स्थिरं सुखम् ॥७०॥

अत्र शृंगाररसे कठिनानां ठादिवर्णानामनुकूलता नास्तीति प्रतिकूलवर्णं वाक्यम्।

यत्रास्थाने पदं वृत्त तद्वाक्यं दीर्घदर्शिभिः।
अस्थानस्थपदं प्रोक्तं तस्य लक्ष्यं निरूप्यते ॥७१॥

तन्वङ्गीतनुमालोक्य सोत्कण्ठो नायको मुदम्।
परमां याति लावण्यवार्धिचन्द्रकलोपमाम् ॥७२॥

---

१. रमणी।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र लावण्येत्यादिपदं सोत्कण्ठ इत्यादिपदेभ्यः पूर्वं वाच्यम् । तस्मादस्थानस्थपदवाक्यम् ।

यत्र वाक्ये समासोऽयमस्थाने वर्तते यदा ।
अस्थानस्थसमासं तद्वाक्यमुक्तं तदा बुधैः ॥७३॥
अस्मिन् लोके तमो व्याप्तमिति क्रोधादिवारुणः ।
भाति पूर्वाचलाग्रस्थतीव्रलोहितमङ्गलः ॥७४॥

अत्र रौद्ररसस्थाने समासबाहुल्यस्यौजोगुणस्य प्रस्तुतत्वात्समासः कर्तव्यः । अस्थाने कविवचने न कर्तव्यः समासः । आदित्यस्य रौद्ररसाभावाद् अस्थानस्थसमासं वाक्यम् ।

विनापि पदेन येनेदं वाक्यं संपूर्णतां गतम् ।
तेनाधिकपदमुक्तं वाक्यं दुष्टं विचक्षणैः ॥७५॥
चन्द्राकारसमा कीर्तिर्भानुबिम्बसमं परम् ।
तेजो विभाति भूपस्य पूर्वपुण्यविपाकतः ॥७६॥

अत्र आकारपदेन बिम्बपदेन च विनापि वाक्यं पूर्णं भवतीत्यधिकपदं वाक्यम् ।

यत्र वाक्ये रसो नास्ति तद्वाक्यं रसबिच्युतम् ।
उच्यते कविभिस्तस्य दृष्टान्तः कथ्यतेऽधुना ॥७७॥
द्विहस्त एककण्ठोऽयं सपादयुगलो नरः ।
डित्थस्य पुत्रो वस्त्रेण युक्तो ग्रामाय गच्छति ॥७८॥

अत्र वाक्यस्य नीरसत्वाज्जातिरप्यलंकारो नास्तीति रसच्युतं वाक्यम् ।

समाप्तपुनरात्तं तद्यस्य यत्समाप्य पुनः स्मृतम् ।
वाक्यमुक्तं तथा तस्य लक्ष्यरूपं निगद्यते ॥७९॥
स्मरेषुश्चन्द्रिका तस्या लीलालोलावलोकनम् ।
तनोतु भवतः प्रीतिं नीलनीरेजमालिका ॥८०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र पादत्रये वाक्यं समाप्तं कृत्वा नीलनीरेजमालिकेति पुनः स्वीकृतमिति समाप्तपुनरात्तं वाक्यम् ।

वक्तव्यमेव न प्रोक्तं यत्र वाक्ये तदुच्यते ।
अनुक्तवाच्यमेतद्धि वाक्यं दुष्टं विशारदैः ॥८१॥

लीलावलोकनात्तन्वि तव मज्जीवसंपदा ।
जायते किं निमित्तं त्वं मां न पश्यसि सेवकम् ॥८२॥

अत्र तव लीलावलोकनादेवेत्येवकारपदं नियमेन वाच्यं तत्पदं नोक्तमित्यनभिहितवाच्यं वाक्यम् ।

अप्रस्तुतस्तुतिं यत्र वक्ति तद्वाक्यमुत्तमैः ।
अप्रस्तुतार्थमित्युक्तं तस्य लक्ष्यं प्रदर्श्यते ॥८३॥

दीर्घदेहो रक्तवर्णो विशालाक्षो धनाधिपः ।
रम्भास्तम्भसमानोरुः कवीशो वर्तते भुवि ॥८४॥

अत्र दीर्घदेहादिविशेषणं कवीन्द्रस्य श्लाघनोपयोगि न स्यादित्यप्रस्तुतार्थं वाक्यम् ।

प्रस्तुतस्य विरुद्धार्थः कथ्यते यत्र तन्मतम् ।
असंमतपदार्थं तु वाक्यं तत्त्वविदां सताम् ॥८५॥

रणादम्बरमालोक्य बहुभीतो भटाग्रणीः ।
जित्वा शत्रुं समालिङ्ग्य वीरलक्ष्मीं प्रमोदते ॥८६॥

अत्र प्रस्तुतस्य भयानकरसस्य विरुद्धो वीररसः कथित इत्यमतपदार्थवाक्यम् ।

अपरार्धगतं यत्र वाचकं त्वेकमुच्यते ।
तद्वाक्यमुक्तमर्थान्तरैकवाचकमीदृशम् ॥८७॥

स्मराग्निपीडिते[1] तन्वि स्मरः [2]क्रूरोऽमरं श्रय ।
तस्मादिति प्रिया दूत्या वाणी प्रोक्ता हिता मिता ॥८८॥

---

१. °पीडिता । २. क्रूरोरमं ।

For Private and Personal Use Only

